*of Public Instruction in Mysore*

## L.C. EXAMINATION

# THE SANSKRIT TEXT
# 1940



800 Copies

MYSORE,
PRINTED BY THE ASST. SUPDT., GOVT. BRANCH PRESS
1939

Price : Re. 0-10-6.

## विषयसूची

पार्श्वम्

ತಿದ್ದುಪಡಿ—12ನೇ ಪುಟದ 79ನೇ ಪಙ್ಕ್ತಿಯಲ್ಲಿ **ಸಮುನ್ಮೀಲನಾಯ** ಎಂಬುದರ ಬದಲಾಗಿ **ಸಮುನ್ಮೂಲನಾಯ** ಎಂದು ಓದಿ. ಮುದ್ರಣ ಪ್ರಮಾದದಿಂದ ಈ ಗ್ರಂಥದಲ್ಲಿ ಕೆಲವು ಸ್ಖಾಲಿತ್ಯಗಳುಂಟಾಗಿವೆ. ಅನೇಕಕಡೆ ಸಂಸ್ಕೃತದ ಪಕಾರ ಷಕಾರಗಳ ವ್ಯತ್ಯಾಸವು ಸ್ಪಷ್ಟವಾಗಿಲ್ಲ ; ಕಾಗುಣಿತಗಳು ವ್ಯತ್ಯಸ್ತವಾಗಿವೆ ; ವತ್ತುಗಳು ಬಿದ್ದುಹೋಗಿವೆ. ಈ ಪ್ರಕಾರವಾದ ದೋಷಗಳನ್ನು ಸಹೃದಯರಾದ ಉಪಾಧ್ಯಾಯರು ಪಾಠಹೇಳುವಾಗ ಸರಿಪಡಿಸಬಹುದೆಂದು ಪ್ರಾರ್ಥನೆ.

# ವಿದ್ಯಾಸಂಪ್ರದಾಯಃ

---

ವಿಜಯನಗರದ ಸಾಮ್ರಾಜ್ಯಕಾಲದಲ್ಲಿ ಮಂಡಿಸಿದ್ದ ಶ್ರೀಸಾಯಣಾಚಾರ್ಯರು ಪವಿತ್ರವಾದ ವೇದಗಳಿಗೆ ಭಾಷ್ಯವನ್ನು ರಚಿಸಿ ಲೋಕಾನುಗ್ರಹಮಾಡಿದರಷ್ಟೆ. ಋಗ್ವೇದ ಭಾಷ್ಯಕ್ಕೆ ಉಪೋದ್ಘಾತವನ್ನು ಬರೆಯುತ್ತಾ ಅದರ ಉಪಸಂಹಾರದಲ್ಲಿ ಈ ವಿದ್ಯಾಸಂಪ್ರದಾಯವನ್ನು ಬೋಧಿಸತಕ್ಕ ನಾಲ್ಕು ವೇದಮಂತ್ರಗಳನ್ನು ಶ್ರೀಯಾಸ್ಕಮಹರ್ಷಿಪ್ರಣೀತವಾದ ನಿರುಕ್ತದಿಂದ ಉದಾಹರಿಸಿದ್ದಾರೆ.

“**न हि ज्ञानेन सदृशं[1] पवित्रमिह विद्यते**” ಎಂಬ ಸೂಕ್ತ್ಯನುಸಾರ ಜ್ಞಾನವೆಂಬುದು ಸರ್ವರಿಗೂ ಉಪಾದೇಯವಾದ ವಸ್ತು. ಅದನ್ನು ಪಡೆಯಬೇಕಾದರೆ ವಿದ್ಯಾರ್ಜನೆಯು ಮುಖ್ಯ. ವಿದ್ಯೆಯು ಅನಾದಿಕಾಲದಿಂದಲೂ ಗುರುವಿನಿಂದ ಶಿಷ್ಯನಿಗೆ ಪರಂಪರೆಯಾಗಿ ಬೋಧಿಸಲ್ಪಡುತ್ತಾ ಬಂದಿರುವುದು. ಪರಂಪರೆಯಾಗಿ ಬಂದಿರುವ ವಿದ್ಯೆ ಅಥವಾ ಕಟ್ಟಲೆಗೆ ಸಂಪ್ರದಾಯವೆನ್ನುತ್ತಾರೆ. ಒಂದು ಕಟ್ಟಲೆಯು ಅಥವಾ ಪದ್ಧತಿಯು ಅನೂಚಾನವಾಗಿ ರೂಢಿಯಲ್ಲಿರಬೇಕಾದರೆ ಅದರಲ್ಲಿ ಕಾಲಚಕ್ರದ ತುಳಿತಕ್ಕೀಡಾಗದ ಕೆಲವು ಮುಖ್ಯ ಲಕ್ಷಣಗಳಿರಬೇಕು. ಉದಾಹರಣೆಗಾಗಿ, ಗುರುವು ಶಿಷ್ಯನಿಗೆ ಪಾಠಹೇಳುವಾಗ ಸುಖವಾಗಿ ಬೋಧೆಯಾಗುವಂತೆ ಸುಲಭರೀತಿಯಲ್ಲಿ ಉಪದೇಶಿಸುವನು. ಗುರುವಿನ ವಿಷಯದಲ್ಲಿ ಶಿಷ್ಯನು ನಮ್ರತೆಯಿಂದಿರುವನು ; ದ್ರೋಹಮಾಡಲಾರ. ಶಿಷ್ಯನು ಅನಸೂಯನೂ, ಜಿತೇಂದ್ರಿಯನೂ ಸದಾಚಾರಸಂಪನ್ನನೂ ಆಗಿರುವನು. ಇವೇ ಮೊದಲಾದ ಗುರುಶಿಷ್ಯ ಧರ್ಮಗಳು ಪದೇಪದೇ ಸ್ಮರಣೆಗೆ ಯೋಗ್ಯವೆಂದು ಭಾವಿಸಿ, ನಿತ್ಯವೂ ಪಠನಮಾಡುವ ತೈತ್ತಿರೀಯೋಪನಿಷತ್ತಿನ ಶಾಂತಿಮಂತ್ರವನ್ನು ಇಲ್ಲಿ ಸ್ಮರಿಸಲಪೇಕ್ಷಿಸುವೆವು. ಅದು ಯಾವುದೆಂದರೆ :—

> **ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।**
> **तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्ति-**
> **श्शान्तिश्शान्तिः ॥**

ಈ ಮಂತ್ರವನ್ನು ಗುರುಶಿಷ್ಯರಿಬ್ಬರೂ ಒಟ್ಟಿಗೆ ಹೇಳುತ್ತಾರೆ. “ಪರಬ್ರಹ್ಮವಸ್ತುವು ನಮ್ಮಿಬ್ಬರನ್ನೂ ಕಾಪಾಡಲಿ. ನಾವಿಬ್ಬರೂ ಅದನ್ನು ಅನುಭವಿಸುವಂತೆ ಕರುಣಿಸಲಿ. ನಾವಿಬ್ಬರೂ ಜ್ಞಾನಾರ್ಥವಾಗಿ ಜೊತೆಯಲ್ಲಿ ಯತ್ನಿ

# ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರಮ್

---

ಕಾಳಿದಾಸನು ಪ್ರಪಂಚದ ಕವಿವರೇಣ್ಯರಲ್ಲೊಬ್ಬನೆಂದು ಎಲ್ಲರಿಗೂ ತಿಳಿದ ಸಂಗತಿ. ರಚಿತವಾದಂದಿನಿಂದ ಅವನ ಕೃತಿಗಳು ಖ್ಯಾತಿಗೊಂಡು ಜನತೆಯಲ್ಲಿ ಗೌರವವನ್ನೂ, ವಿಶೇಷವಾಗಿ ಆದರವನ್ನೂ ಪಡೆದವು. ಸಂಸ್ಕೃತ ವಿದ್ಯಾಭ್ಯಾಸದಲ್ಲಿ ಕಾವ್ಯಪಾಠವೆಂದರೆ ರಘುವಂಶ, ಕುಮಾರ ಸಂಭವ ಇವನ್ನು ಮೊದಲು ಓದಬೇಕು ; ನಾಟಕವೆಂದರೆ ಶಾಕುಂತಲ. ಹೀಗೆ ನಿತ್ಯವೂ ಜನವೆಲ್ಲಾ ಅವನ ನಾಮಸ್ಮರಣೆಯನ್ನು ಮಾಡುತ್ತಿರುವಾಗ, ಅವನು ಯಾರು, ಯಾವ ಕಾಲದಲ್ಲಿ ಯಾವ ದೇಶವನ್ನು ಮಂಡಿಸಿದನು, ಲೋಕೋತ್ತರವಾದ ಕಾವ್ಯಪದ್ಧತಿಯನ್ನು ತೋರಿಸಿಕೊಟ್ಟ ಅವನ ಜೀವನ ಚರಿತ್ರೆ ಎಂತಹುದು, ಎಂಬೀ ಮೊದಲಾದ ವಿಷಯಗಳು ಜನರ ಅರಿವಿಗೆ ಬಾರದಿರುವುದು ಆಶ್ಚರ್ಯಕರವಾಗಿದೆ. ಆದರೂ ನವೀನಸಂಶೋಧನೆಯ ಪ್ರಕಾರ ವಿದ್ವಾಂಸರು ಯಾವರೀತಿ ಈ ವಿಷಯಗಳನ್ನು ಊಹೆಯಿಂದ ಸಮರ್ಥಿಸಿದ್ದಾರೆಂಬುದನ್ನು ಇಲ್ಲಿ ಸಂಗ್ರಹವಾಗಿ ತಿಳಿಯಬಹುದು.

ಕಾಳಿದಾಸನು ಮೊದಲು ಮೊದಲು ಏನೂ ತಿಳಿಯದ ಮೂಢನಾಗಿದ್ದನು ; ಒಂದಾನೊಂದು ಸಮಯದಲ್ಲಿ ಕಾಳಿಕಾದೇವಿಯ ಪ್ರಸಾದದಿಂದ ಕವಿತಾಶಕ್ತಿಯನ್ನೂ, ದಿವ್ಯಪಾಂಡಿತ್ಯವನ್ನೂ ಪಡೆದು ಅಂದಿನಿಂದ ಕಾಳಿದಾಸನೆಂದು ಪ್ರಸಿದ್ಧನಾದನು. ಧಾರಾನಗರದ ಭೋಜರಾಜನಿಗೂ ಅವನಿಗೂ ಬಹಳ ಸ್ನೇಹವಿತ್ತು ; ಮಾಘ, ಭಾರವಿ, ಭವಭೂತಿ, ಬಾಣಭಟ್ಟ ಮೊದಲಾದ ಕವೀಶ್ವರರ ಸಂಘದಲ್ಲಿ ಅಗ್ರಗಣ್ಯ ; ಸಮಸ್ಯಾಪೂರಣದಲ್ಲಿ ಸಾಟಿಯಿಲ್ಲದವನು. ಒಂದು ಸಾರಿ ಸಿಂಹಳದ್ವೀಪದ ದೊರೆಯಾದ ಕುಮಾರದಾಸನ ಆಸ್ಥಾನಕ್ಕೆ ಹೋಗಿದ್ದಾಗ ಒಬ್ಬ ನರ್ತಕಿಯಿಂದ ಮರಣಹೊಂದಿದನು. ಈ ಪ್ರಕಾರ ಕಾಳಿದಾಸನ ವಿಷಯದಲ್ಲಿ ವಿಧವಿಧವಾದ ಕಥೆಗಳು ಪ್ರಚಾರದಲ್ಲಿವೆ. ಆದರೆ ಇವೆಲ್ಲಾ ನಂಬುವುದಕ್ಕೆ ಅನರ್ಹವಾದ ಶುಷ್ಕಕಲ್ಪನೆಗಳೆಂದೇ ಹೇಳಬೇಕು. ಪಜ್ತಿಪಜ್ತಿಯಲ್ಲಿಯೂ ಪ್ರಕಾಶಿಸುವ ಅನುಪಮಕವಿತಾಶಕ್ತಿ, ವಿಷಯಗಾಂಭೀರ್ಯ, ಅತ್ಯುತ್ತಮದೆಸೆಯಲ್ಲಿದ್ದ ಆರ್ಯಸಂಸ್ಕೃತಿ, ಇವುಗಳನ್ನು ನೋಡಿದರೆ ದೇವತಾನುಗ್ರಹವನ್ನು ಪಡೆದ ಮೂಢನ ದಿವ್ಯಕವಿತೆಯೆಂದು ನಂಬುವುದು ಕಷ್ಟ. ಚರಿತ್ರೆಯಪ್ರಕಾರ ಕ್ರಿ. ಶ. ಹನ್ನೊಂದನೆಯ ಶತಮಾನದಲ್ಲಿದ್ದ ಧಾರಾನಗರದ ಭೋಜರಾಜನಿಗೂ ನಮ್ಮ ಕಾಳಿದಾಸನಿಗೂ ಶತ

ಮಾನಗಳ ಅಂತರವೆಂಬುದು ನಿರ್ವಿವಾದ. ಹಾಗೆಯೇ ಸಿಂಹಳದ್ವೀಪದ ಕುಮಾರದಾಸನ ಪ್ರಸಂಗವೂ ಪ್ರಮಾಣರಹಿತವಾಗಿದೆ.

ವಿಕ್ರಮಾದಿತ್ಯರಾಯನ ಒಡ್ಡೋಲಗದ ನವಮಣಿ[7]ಗಳಲ್ಲಿ ಕಾಳಿದಾಸನೊಬ್ಬನು—ಎಂಬ ಮತ್ತೊಂದು ಇತಿಹಾಸವು ಹೆಚ್ಚು ಬಳಕೆಯಲ್ಲಿದೆ. ಅದನ್ನು ಒಪ್ಪಲೂಬಹುದು. ಆದರೆ ವಿಕ್ರಮಾದಿತ್ಯನೆಂಬ ಹೆಸರಿನಿಂದ ಪ್ರಸಿದ್ಧರಾದ ರಾಜರು ಹಲವರಿದ್ದಾರೆ. ಕ್ರಿ. ಪೂ. 57ರಲ್ಲಿ ಶಕರನ್ನು ಸೋಲಿಸಿ ವಿಕ್ರಮಶಕೆಯನ್ನು ಸ್ಥಾಪಿಸಿದವನು ವಿಕ್ರಮಾದಿತ್ಯ. ಗುಪ್ತರ ಕಾಲದಲ್ಲಿ ಕ್ರಿ. ಶ. 375–413ರ ವರೆಗೆ ಆಳಿದ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತನು ವಿಕ್ರಮಾದಿತ್ಯನೆಂಬ ಹೆಸರನ್ನು ಪಡೆದನು. ಅವನ ಮೊಮ್ಮಗನಾದ ಸ್ಕಾಂದಗುಪ್ತನೂ ಅದೇ ಬಿರುದನ್ನು ತಾಳಿದ್ದನು. ಇವರಲ್ಲಿ ಯಾವ ವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ ಕಾಳಿದಾಸನಿದ್ದನೆಂಬುದನ್ನು ಹೇಳುವುದು ಕಷ್ಟ. ಶಕೆಯನ್ನು ಸ್ಥಾಪಿಸಿದ ವಿಕ್ರಮಾದಿತ್ಯರಾಯನ ಆಸ್ಥಾನದಲ್ಲಿಯೇ ಇದ್ದುದೆಂದು ಕೆಲವರು ನಂಬುತ್ತಾರೆ. ಗುಪ್ತರ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತನ ಕಾಲದವನೆಂದು ಮತ್ತೆ ಕೆಲವರು ಸಮರ್ಥಿಸುತ್ತಾರೆ.

ಭರತಖಂಡದ ಸೌಭಾಗ್ಯ ಸಂಪತ್ತು ಅತ್ಯುತ್ತಮಸ್ಥಿತಿಯಲ್ಲಿದ್ದಾಗ ಕಾಳಿದಾಸನು ಅವತರಿಸಿದ್ದನೆಂಬುದು ಮಾತ್ರ ನಿಜ. ಏಕೆಂದರೆ ಸಾಮಾನ್ಯವಾಗಿ ಅವನ ಬರವಣಿಗೆಯಲ್ಲಿ ಒಂದು ಸುಖಮಯವಾದ, ದುಃಖದೂರವಾದ ಚಿತ್ತವೃತ್ತಿಯು ದೇದೀಪ್ಯಮಾನವಾಗಿದೆ. ಹಿಮಾಲಯದ ದೇವದಾರು, ಕಳಿಂಗದೇಶದ ತಾಂಬೂಲ, ಮಲಯಾಚಲದ ಚಂದನ, ಕೇರಳಪ್ರಾಂತದ ಖರ್ಜೂರ, ಸಿಂಧುದೇಶದ ಮರಳು, ಕಾಶ್ಮೀರದ ಕುಂಕುಮಕೇಸರಿ—ಇವೇ ಮುಂತಾದ ಅಂಶಗಳನ್ನೊಳಗೊಂಡ ರಘುಮಹಾರಾಯನ ದಿಗ್ವಿಜಯವರ್ಣನೆಯಿಂದ ಕಾಳಿದಾಸನಿಗೆ ನಮ್ಮ ದೇಶದ ಅನೇಕ ಪ್ರಾಂತಗಳ ಪರಿಚಯವಿತ್ತೆಂದು ಹೇಳಬಹುದು. ರಘುವಂಶಾದಿ ಕಾವ್ಯಗಳನ್ನು ಪರಿಶೀಲಿಸಿದರೆ ಅಶ್ವಘೋಷನೇ ಮೊದಲಾದ ಪ್ರಾಚೀನ ಕವಿಗಳ ಕಾಲಕ್ಕಿಂತ ಇವನ ಕಾಲದಲ್ಲಿ ಕಾವ್ಯಸರಣಿಯು ನಿಯತವಾಗಿ ರೂಪುಗೊಂಡಿತ್ತೆಂದು ಸ್ಪಷ್ಟವಾಗುತ್ತದೆ. ಬಹುಶಃ ಗುಪ್ತಸಾಮ್ರಾಜ್ಯವೈಭವವು ಇವನ ಗ್ರಂಥಗಳಲ್ಲಿ ಪ್ರತಿಫಲಿತವಾಗಿರುವುದು.

ಇದಕ್ಕೆ ಉಪಷ್ಟಂಭಕವಾಗಿ ಇನ್ನೂ ಕೆಲವು ವಿಷಯಗಳನ್ನು ಜ್ಞಾಪಿಸಿಕೊಳ್ಳಬಹುದು. ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರವೆಂಬ ತನ್ನ ನಾಟಕದ ಪ್ರಸ್ತಾವನೆಯಲ್ಲಿ ಕ್ರಿ. ಶ. ಸುಮಾರು ಮೂರನೇ ಶತಮಾನದಲ್ಲಿದ್ದ ಭಾಸಕವಿಯನ್ನು ಕೊಂಡಾಡಿರುವುದರಿಂದ[8] ಅವನಿಗಿಂತ ಕಾಳಿದಾಸನು ಈಚಿನವನು. ಕ್ರಿ. ಶ. 634ರಲ್ಲಿ ಹುಟ್ಟಿದ ಐಹೋಳೆಯ ಶಾಸನದಲ್ಲಿ ಕಾಳಿದಾಸ, ಭಾರವಿ ಮೊದ

ಲಾದ ಕವಿಗಳು ಕೀರ್ತಿತರಾಗಿದ್ದಾರೆ. ಕ್ರಿ. ಶ. 606–648ರ ವರೆಗೆ ರಾಜ್ಯ ವಾಳಿದ ಶ್ರೀಹರ್ಷಚಕ್ರವರ್ತಿಯ ಆಸ್ಥಾನದಲ್ಲಿದ್ದ ಬಾಣಭಟ್ಟನು ತನ್ನ ಹರ್ಷ ಚರಿತ್ರೆಯೆಂಬ ಗ್ರಂಥದ ಉಪೋದ್ಘಾತದಲ್ಲಿ ಇತರ ಕವಿವರ್ಯರ ಮಧ್ಯೆ ಕಾಳಿದಾಸನ ಸೂಕ್ತಿಯನ್ನು ಹೊಗಳಿದ್ದಾನೆ.[9] ಅಲ್ಲದೆ ವತ್ಸಭಟ್ಟಿಯೆಂಬ ಕವಿಯು ಕ್ರಿ.ಶ. 473ರಲ್ಲಿ ಬರೆದ ಮಾಂಡಸೂರಿನ ಸೂರ್ಯದೇವಾಲಯದಲ್ಲಿ ಸಿಕ್ಕಿರುವ ಪ್ರಶಸ್ತಿಯಲ್ಲಿ ಕಾಳಿದಾಸನ ಕಾವ್ಯದ ಅನುಕರಣವು ವ್ಯಕ್ತವಾಗಿದೆ. ಆದುದರಿಂದ ಕಾಳಿದಾಸನು ಕ್ರಿ.ಶ. 300 ರಿಂದ 473ರ ಮಧ್ಯದಲ್ಲಿದ್ದ ನೆಂದು ಹೇಳಬೇಕು. ಕ್ರಿ.ಶ. 375 ರಿಂದ 413ರ ವರೆಗೆ ಆಳಿದ ಚಂದ್ರ ಗುಪ್ತವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ ಆಸ್ಥಾನಕವಿಯಾಗಿದ್ದನೆಂದರೆ ತಪ್ಪಾಗ ಲಾರದೆಂದು ವಿದ್ವಾಂಸರ ಅಭಿಪ್ರಾಯ. ಗುಪ್ತರ ರಾಜಧಾನಿಯು ಪಾಟಲಿ ಪುತ್ರದಿಂದ ಉಜ್ಜಯಿನಿಗೆ ಬದಲಾವಣೆಯಾದುದು ಈ ವಿಕ್ರಮಾದಿತ್ಯನ ಕಾಲದಲ್ಲಿ. ಹೊಸ ರಾಜಧಾನಿಯನ್ನು ಕಾಳಿದಾಸನು ಅಲ್ಲಲ್ಲಿ ಅತಿಶಯವಾದ ಉತ್ಸಾಹದಿಂದ ವರ್ಣಿಸಿರುವನು. ವಿಕ್ರಮನ ಆಸ್ಥಾನದ ನವಮಣಿಗಳ ಲ್ಲೊಬ್ಬನೆಂಬ ಇತಿಹಾಸವು ಚರಿತ್ರೆಯ ದೃಷ್ಟಿಯಿಂದ ನಂಬಿಕೆಗೆ ಅರ್ಹವಲ್ಲ ವಾದರೂ ವಿಕ್ರಮಕಾಳಿದಾಸರ ವಿಶೇಷ ಸಂಬಂಧವನ್ನು ಸಮರ್ಥಿಸುವುದ ರಿಂದ ಮೇಲ್ಕಂಡ ಊಹೆಗೆ ಸಹಾಯಕವಾಗುವುದು. ಅಲ್ಲದೆ ವಿಕ್ರಮೋ ರ್ವಶೀಯನಾಟಕದಲ್ಲಿ ಪುರೂರವನಿಗೆ ವಿಕ್ರಮನೆಂಬ ನಾಮಾಂತರವನ್ನೇ ಉಪಯೋಗಿಸಿರುವುದು ತನಗೆ ಆಶ್ರಯಕೊಟ್ಟ ದಣಿಯನ್ನೇ ಉದ್ದೇಶಿಸಿರ ಬಹುದು. ಕುಮಾರಸಂಭವ ಕಾವ್ಯವು ವಿಕ್ರಮಾದಿತ್ಯನ ಮಗನಾದ ಕುಮಾ ರಗುಪ್ತನ ಜನನಸ್ಮಾರಕವಾಗಬಾರದೇಕೆ? ಹಾಗೆಯೇ ರಘುವಂಶದ ರಘುವಿನ ದಿಗ್ವಿಜಯವೂ, ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರದ ಅಶ್ವಮೇಧಪ್ರಸಂಗವೂ ವಿಕ್ರಮನ ತಂದೆಯಾದ ಸಮುದ್ರಗುಪ್ತನ ದಿಗ್ವಿಜಯವನ್ನೂ, ಅವನು ಮಾಡಿದ ಅಶ್ವಮೇಧಯಾಗವನ್ನೂ ಜ್ಞಾಪಕಕ್ಕೆ ತರುವುದೆಂದರೆ ಅಸಮಂಜ ಸವಾಗಲಾರದು. ಈ ಪ್ರಕಾರವಾಗಿ ಕಾಳಿದಾಸನು ಸುಮಾರು ಕ್ರಿ.ಶ. 400ರಲ್ಲಿ ಎರಡನೇ ಚಂದ್ರಗುಪ್ತವಿಕ್ರಮಾದಿತ್ಯನ ಆಸ್ಥಾನದಲ್ಲಿ ರಾರಾಜಿಸು ತ್ತಿದ್ದನೆಂದು ನಿರ್ಣಯಿಸಬಹುದು.

'ಕಾಳಿದಾಸ ವಿರಚಿತ' ವೆಂದು ನೂರಾರು ಗ್ರಂಥಗಳಿವೆ. ಯಶಃ– ಕಾಮಿಗಳಾದ ಕವಿಗಳು ತಮ್ಮ ತಮ್ಮ ಪ್ರಬಂಧಗಳ ಕೊನೆಯಲ್ಲಿ ಕಾಳಿದಾಸ ವಿರಚಿತ ಎಂದು ಹೇಳುತ್ತಿದ್ದರು.[10] ಆ ಕಾಲದಲ್ಲಿ ಮುದ್ರಣಸೌಲಭ್ಯವಿಲ್ಲದೆ ಗ್ರಂಥಪ್ರಚಾರವು ಅನಿಯತವಾಗಿ ಈ ವಿಧವಾದ ನ್ಯೂನತೆಗೆ ಅವಕಾಶವಿ ದ್ದಿತು. ಶೈಲಿ, ವರ್ಣನೆ ಮುಂತಾದ ಕಾವ್ಯಲಕ್ಷಣಗಳನ್ನು ಪರಿಶೀಲಿಸಿ, ಕಾಳಿದಾಸನು ರಘುವಂಶ, ಕುಮಾರಸಂಭವ, ಮೇಘದೂತ, ಋತುಸಂಹಾ

ರವೆಂಬ ಕಾವ್ಯಗಳನ್ನೂ, ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರ, ವಿಕ್ರಮೋರ್ವಶೀಯ, ಶಾಕುಂತಲವೆಂಬ ನಾಟಕಗಳನ್ನೂ ಬರೆದನೆಂದು ನಂಬಿದ್ದೇವೆ.

ಕಾಳಿದಾಸನ ಮಹತ್ತ್ವವನ್ನು ಪ್ರಾಚೀನರು ವಿಧವಿಧವಾಗಿ ವರ್ಣಿಸಿದ್ದಾರೆ. ಆಧುನಿಕರೂ ಸವಿಮರ್ಶವಾಗಿ ಅವನ ಕಾವ್ಯಕೌಶಲವನ್ನು ಶ್ಲಾಘಿಸಿರುವರು.[11] 'ಉಪಮಾ ಕಾಲಿದಾಸಸ್ಯ' ಎಂಬ ಹೊಗಳಿಕೆಯು[12] ಲೋಕಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಉಪಮಾಲಂಕಾರಗಳ ಪ್ರಯೋಗದಲ್ಲಿ ಕಾಳಿದಾಸನು ಅಸಮಾನನೆಂದು ಅದರ ಭಾವ. ಆದರೆ ಗುಣಾಂತರಗಳಲ್ಲಿ ಅವನು ಶ್ಲಾಘ್ಯನೆಂದಲ್ಲ. ಕಾಳಿದಾಸನ ಜ್ಞಾನವೂ ಲೋಕಾನುಭವವೂ ವಿಸ್ತಾರವಾದುವು. ನಿರಂತರವೂ ರಾಜಾಶ್ರಯವನ್ನು ಪಡೆದು ಸುಖಿಯಾಗಿದ್ದುದರಿಂದ ನಿಖಿಲ ನಾಗರಿಕಸಂಪತ್ತನ್ನು ಹೃದಯಂಗಮವಾಗಿ ಅಲ್ಲಲ್ಲಿ ವರ್ಣಿಸಿರುತ್ತಾನೆ. ಅರಣ್ಯ, ಋಷ್ಯಾಶ್ರಮ, ತಪಶ್ಚರ್ಯೆ ಮುಂತಾದುವು ಗಂಭೀರವಾಗಿಯೂ ವಸ್ತುಸ್ಥಿತಿಗನುಸಾರವಾಗಿಯೂ, ಜ್ಞಾನದಾಯಕವಾಗಿಯೂ ವಿವರಿಸಲ್ಪಟ್ಟಿವೆ. ಇದಕ್ಕೆ ಮೇಲೆ ಸೂಚಿಸಿದಂತೆ, ಕವಿಗಿದ್ದ ದೇಶಪರಿಚಯವೇ ಕಾರಣ. ಶೃಂಗಾರಾದಿ ನವರಸಗಳನ್ನು—ಅದರಲ್ಲಿಯೂ ಶೃಂಗಾರರಸವನ್ನು—ಪ್ರತಿಪಾದಿಸುವುದರಲ್ಲಿ ಕಾಳಿದಾಸನು ಅದ್ವಿತೀಯನು. ಶೈಲಿಯು ಅತ್ಯುತ್ತಮವಾದ ವೈದರ್ಭೀ ರೀತಿಯನ್ನನುಸರಿಸಿದೆ. ಕಾಳಿದಾಸನ ಮಹತ್ತ್ವವನ್ನು ತಿಳಿದವರು ಇತಿಹಾಸರೂಪದಲ್ಲಿ ಹೀಗೆ ಉದ್ಘೋಷಿಸಿದ್ದಾರೆ :—

**पुरा कवीनां गणनाप्रसङ्गे**
**कनिष्ठिकाधिष्ठितकालिदासा ।**
**अद्यापि तत्तुल्यकवेरभावात्**
**अनामिका सार्थवती बभूव ॥**

ಪ್ರಕೃತ, ಕಾಳಿದಾಸನು ರಚಿಸಿದ ನಾಟಕತ್ರಯದಲ್ಲಿ ಮೊದಮೊದಲು ರಚಿತವಾದುದೆಂದು ನಂಬಲಾಗಿರುವ ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರವೆಂಬುದನ್ನು ಇಲ್ಲಿ ಗದ್ಯರೂಪವಾಗಿ ಅನುವಾದಮಾಡಲಾಗಿದೆ. ವಸ್ತುತಃ, ಗದ್ಯಾನುವಾದವು ನಾಟಕದ ನೈಸರ್ಗಿಕವಾದ ಸೊಂಪನ್ನು ಪಡೆಯಲಾರದು. ಅದರಲ್ಲಿಯೂ ಕವಿಚಕ್ರವರ್ತಿಯ ವಾಗ್ಗುಂಭನವನ್ನು ಅನುಕರಿಸುವುದು ಅಸುಲಭ. ಆದರೂ ಚಮತ್ಕಾರವನ್ನುಂಟುಮಾಡುವ ಗೌತಮಾಗ್ನಿಮಿತ್ರರ ಸಂವಾದ, ವಿದೂಷಕನ ಸಂಧಾನ, ಕೌಶಿಕಿಯ ನ್ಯಾಯಸರಣಿ, ಉಪಾಧ್ಯಾಯರ ಸ್ಪರ್ಧೆ, ಮಾಲವಿಕೆ ಬಕುಳಾವಳಿಕೆ ಇವರ ಸ್ವೈರಾಲಾಪ, ಇರಾವತಿಯ ಕೋಪ

ಪ್ರಸಂಗ, ಧಾರಿಣೀ ದೇವಿಯ ಉದಾತ್ತವರ್ತನೆ—ಇವುಗಳನ್ನು ಬಹು ಮಟ್ಟಿಗೆ ಕವಿಯ ಮಾತಿನಲ್ಲಿಯೇ ಪ್ರತಿಪಾದಿಸಲು ಯತ್ನಮಾಡಿದೆ.

ಅಗ್ನಿಮಿತ್ರರಾಜನು ಪ್ರಕೃತ ನಾಟಕದಲ್ಲಿ ಕೇವಲ ಶೃಂಗಾರನಾಯಕ ನಾಗಿ ಕಾಣುವನಾದರೂ ಕ್ಷತ್ರಿಯನಿಗೆ ಸಲ್ಲುವ ಶೌರ್ಯಾದಿ ಗುಣಗಳನ್ನು ಹೊಂದಿದ್ದನೆಂದು ನಂಬಬಹುದು ಗೌತಮನಾಮಾಂಕಿತನಾದ ವಿದೂಷಕನು ವೇಷ, ಭಾಷೆ, ಉದರಂಭರಿತ್ವ ಇವುಗಳಿಂದ ಮಾತ್ರ ಹಾಸ್ಯಕಾರಿಯಾಗಿರದೆ, ರಾಜನ ಇಷ್ಟಾರ್ಥಸಿದ್ಧಿಗಾಗಿ ನಿಜವಾದ ಚಾತುರ್ಯದಿಂದ ಸನ್ನಿವೇಶಗ ಳನ್ನು ಕಲ್ಪಿಸುವನು ; ದಕ್ಷತೆಯಿಂದ ಸಂಕಟಗಳನ್ನು ಪರಿಹಾರಮಾಡುವನು. ವಿರಕ್ತಳಾದ ಪಂಡಿತಕೌಶಿಕಿಯು ಜ್ಞಾನಸಂಪನ್ನಳು ಮತ್ತು ಕಲಾನಿಪುಣೆ. ನಾಟಕದಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ ಸ್ತ್ರೀಯರು ಪ್ರಾಕೃತಭಾಷೆಯಲ್ಲಿ ಮಾತನಾ ಡುವುದು ರೂಢಿ. ಆದರೆ ವಿದುಷಿಯರ ಕೋಟಿಗೆ ಸೇರಿದ ಕೌಶಿಕಿಯು ಸಂಸ್ಕೃತದಲ್ಲಿ ಮಾತನಾಡುತ್ತಾಳೆ. ಮಾಲವಿಕೆಯು ಸೌಂದರ್ಯ, ಸೌಕು ಮಾರ್ಯ, ವಿನಯ, ಕಲಾಸಕ್ತಿ ಮುಂತಾದ ಸಹಜ ಸದ್ಗುಣಗಳಿಂದಲಂಕೃತ ಳಾದ ನವವಧು. ಧಾರಿಣೀದೇವಿಯ ಗುಣಗಳು ಸ್ತೋತ್ರಾರ್ಹವಾದುವು. ಸಂಸಾರದಲ್ಲಿ ಸಂಭವಿಸುವ ಪರಿಪರಿಯಾದ ಶುಭಾಶುಭಗಳನ್ನು ಧೈರ್ಯ ಸ್ಥೈರ್ಯಗಳಿಂದ ಅನುಭವಿಸಿ ಅನುಭವಿಸಿ ಪರಿಪಕ್ವವಾದ ಚಿತ್ತವೃತ್ತಿ ಮತ್ತು ಉದಾತ್ತವಾದ ವರ್ತನೆ ಇವುಗಳಿಂದಲಂಕೃತಳಾದ ಸದ್ಗೃಹಿಣಿಯಂತೆ ವಿರಾಜಿಸುತ್ತಾಳೆ.

ನಾಟಕದ ಗದ್ಯಾನುವಾದದಲ್ಲಿ ಅನೌಚಿತ್ಯಗಳೂ ಸ್ಖಾಲಿತ್ಯಗಳೂ ಕಂಡುಬರುವುದಾದರೆ ಅವು ಅನುವಾದಕನ ಪ್ರಮಾದಗಳೇ ಹೊರತು ಮೂಲಗ್ರಂಥಕ್ಕೆ ಸಂಬಂಧಿಸುವವುಗಳಲ್ಲ. ಸಂದೇಹವುಂಟಾದಾಗ ಕಾಳಿದಾ ಸನೇ ಪ್ರಮಾಣವೆಂದು ಸಹೃದಯರು ದಯಮಾಡಿ ಭಾವಿಸಬೇಕು.

---

# मालविकाग्निमित्रम्

(गद्यानुवादः)

**एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यस्स्वयं कृत्तिवासाः**
**कान्तासम्मिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम् ।**
**अष्टाभि[13]र्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः**
**सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥**

आसीत्पुरास्मिन् भारते वर्षे विख्यातभूपालपरम्पराधिष्ठिता विदिशाख्या राजधानी । तत्र शौर्यस्थैर्यादिक्षत्रियोचितगुणगणानामाकरो नरपतिरग्निमित्रो नाम विराजति स्म[14] । पिता तस्य पुष्पमित्रो नाम सेनानीर्मगधाधिराजं मौर्यवंशजं बृहद्रथमुत्पाट्य स्वयमेव सार्वभौमपदवीमारूढः पाटलिपुत्राह्वां राजधानी[15]मध्यास्त इतिहीतिहासेषु प्रसिद्धः । यद्यपि पुष्पमित्रस्य प्रतिनिधिरसावग्निमित्रस्तथापि स्वीयैरुदारचरितैस्तूर्णमेव सुराजे[16]ति प्रथां प्राप्य निखिलानां प्रजानामखण्डमनुरागमानर्ज[17] । एवं गच्छति काले, राजकुले कश्चन प्रणयप्रसङ्गस्समभवत् । स किल कविसार्वभौमेन कालिदासेन मालविकाग्निमित्रनाम्नि[18] नाटके सरसं प्रपञ्चितो दृश्यते । साम्प्रतं नाटकस्यास्य कथावस्तु यथामति गद्यरूपेण पुनराकलयितुमयमुद्यमः कल्पतामुल्लासाय ॥

अस्य राज्ञोऽग्निमित्रस्य धारिणीरावती चेति भार्ये बभूवतुः । तयोः कनीयस्यामिरावत्यां राज्ञो बहुमानातिशय इति न खलु चित्रम् । एवं सति कदाचिद्देव्या धारिण्या भ्राता वीरसेनो नामान्तपालः[19] काञ्चन मालविकानाम्नीं लावण्यार्णवां कन्यामुपा-

यनं स्वस्रे प्रेषितवान् । देवी च मुग्धमधुरां निसर्गकलाभिनिवेशां दारिकां वीक्ष्य, तां नाट्यकलायामुपदेष्टुं गणदासं नाम नाट्याचार्यं न्ययुङ्क्त । सापि मालविकानुपमकौशलेन क्षिप्रमेव कलासु परं प्रावीण्यमधिजगाम ॥

कदाचिद्देव्या धारिण्याश्चेटी बकुलावलिका, अचिरप्रवृत्तोपदेशं[20] चलितं[21] नाम नाट्यम[22]न्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुं सङ्गीतशालां प्रस्थिता, अन्यां कौमुदिकां मार्गे समासाद्य शिल्पिसकाशाद्देव्यै तया नीयमानं नागमुद्रासनाथमङ्गुलीयकं सशिरःकम्पं प्रशस्य मालविकाविषये सख्यैवमनुयुक्ता—

**कौमुदिका**—सखि, ईदृशेन व्यापारेण[23]सन्निहितापि भर्त्रा कथमेषा दृष्टा ।

**बकुलावलिका**—स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः । शृणु । चित्रशालां गता देवी प्रत्यग्रवर्णरागां काञ्चन चित्रलेखामालोकयन्ती यावत्तिष्ठति तावद्भर्तोपस्थितः । उपचारानन्तरं[24] भर्त्रा चित्रगताया देव्याः परिजनमध्यगतामासन्नतरां तां प्रेक्ष्य देवी पृष्टा—अपूर्वेयं दारिका, आसन्ना च देव्या लिखिता, किन्नामधेयेति । ततो यदान्यत्र दत्तदृष्टिर्देवी किमपि नावोचत्तदा शङ्कितो भर्ता पुनः पुनर्निर्बन्धुं प्रवृत्तः । यावद्देवी न कथयति तावत्कुमार्या वसुलक्ष्म्याख्यातं—आवुत्त, एषा मालविकेति । अतः परं मालविका सविशेषं भर्तुर्दर्शनपथाद्रक्ष्यते ॥

इतीमं मालविकागतं वृत्तान्तं सख्यै निवेद्य प्रस्थिता बकुलावलिका । अनुपदमेव सङ्गीतशालातो निष्क्रममाणमार्यगणदासमुपससार । तस्य किलाचार्यस्य नाट्यविद्यां प्रति न मिथ्या-

गौरवम् । यतः—

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्[25] ॥ २

इत्थं कुलविद्यामन्तर्बहिश्च परमं मन्यमानमार्यगणदासं समुदाचारेणाभिवाद्य पप्रच्छ—आर्य, देवी पृच्छति, अप्युपदेशग्रहणे नातिक्लेशयति वश्शिष्या मालविकेति । गणदासः प्रत्यवदत्—भद्रे, विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति । तदाचार्यभूतेन मयापि यशस्विना भवितव्यम् । यतः—

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः[26] ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ ३ ॥

इति । एवंरूपां प्रशंसोक्तिं श्रुत्वा मालविकां मनसाभिनन्दन्ती, चिरादपि नाट्ये शिक्ष्यमाणामिरावतीमिदानीं मालविकयातिक्रान्तामिव च पश्यन्ती, विस्मयाविष्टा आचार्यमामन्त्र्य[27] निर्जगाम॥

अन्येद्युरेकान्तस्थपरिजनो राजा लेखहस्तेन[28] मन्त्रिणान्वास्यमानोऽनुवाचितलेखं[29] तमन्वयुङ्क्त[30]—वाहतक, किं प्रतिपद्यते वैदर्भः ?

**अमात्यः**—देव, आत्मविनाशम् ।

**राजा**—सन्देशमिदानीं श्रोतुमिच्छामि ।

**अमात्यः**—इदमिदानीमनेन प्रतिलिखितम्—पूज्येना[31]हमादिष्टः—

"भवतः पितृव्यपुत्रः कुमारो माधवसेनः प्रतिश्रुतसम्बन्धो

ममान्तिकमागच्छन्नन्तरा त्वदीयेनान्तपालेनावस्कद्य गृहीतः। स त्वया मदपेक्षया सकलत्रसोदर्यो मोचयितव्यः" इति। तन्न वो न विदितं यत्समानाभिजनेषु[32] भूमिहरेषु राज्ञां वृत्तिरीदृशी। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति। सोदर्या पुनरस्य ग्रहणविप्लवे विनष्टा। तदन्वेषणाय प्रयतिष्ये। अथवावश्यमेव माधवसेनः पूज्येन मोचयितव्यः,[33] श्रूयतामभिसन्धिः॥

**मौर्यसचिवं विमुञ्चति यदि पूज्यस्संयतं मम स्यालम्।**
**मोक्ता[34] माधवसेनं ततोऽहमपि बन्धनात्सद्यः॥ ४॥** इति।

**राजा**—कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः[35]। वाहतक, प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः। तद्यातव्यपक्षे[36] स्थितस्य पूर्वसङ्कल्पितसमुन्मीलनाय वीरसेप्रमुखं दण्डचक्रमाज्ञापय॥

अमात्यस्तथेत्याज्ञानिर्वाहाय निष्क्रान्तः।

अत्रान्तरे चित्रशालायां मालविकाप्रतिकृतेर्दर्शनात्प्रभृति सञ्जातकौतूहलो राजा नर्मसचिवं[37] विदूषकमादिदेश–गौतम, चिन्तय तावदुपायं यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति। विदूषकस्तथैव स्वकौशलेन सन्धाय राज्ञे निवेदयितुं तमाससाद॥

**राजा**—वयस्य, कच्चिदुपयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः[38]।

**विदूषकः**—प्रयोगसिद्धिं पृच्छ।

**राजा**—कथमिव।

**विदूषकः**—(कर्णे) एवमिव।

**राजा**—साधु वयस्य, निपुणमुपक्रान्तम् । इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे । कुतः—

**अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।**
**दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि[39] ।।५।।**

एवं सम्भाषमाणयोस्तयोरदूरे श्रुतेयं वादसरणिः—अलमलं बहुविकत्थ्य ; राज्ञस्समक्षमेवावयोरधरोत्तरव्यक्ति[40]र्भविष्यति । तदाकर्ण्य राजा हृष्टो बभाषे—सखे त्वत्सुनीतिपादपस्य पुष्पमुद्भिन्नम्, इति । विदूषको हसन् जगाद--फलमप्यचिरेण द्रक्ष्यसीति ॥

अस्मिन्नवसरे कञ्चुकी प्रविश्य प्रभोराज्ञानुष्ठितेत्यमात्यवचनं विज्ञापयित्वा राजदर्शनाभिलाषिणौ परस्परजयैषिणौ हरदत्तगणदासावाचार्यौ द्वारस्थितौ निवेदयामास । तदाज्ञप्तश्च तौ प्रवेशयामास । राजसमीपमुपसर्पतोस्तयोः, आर्यगणदास इत्थमवर्णयद्दुरासदं राजमहिमानम्—

**न च न परिचितो न चाप्यरम्य-**
**श्चकितमुपैमि तथापि पार्श्वमस्य ।**
**सलिलनिधिरिव प्रतिक्षणं मे**
**भवति स एव नवो नवोऽयमक्ष्णोः ॥ ६ ॥**

तदनु राज्ञे विजयमाशंस्याचार्यौ परिजनोपनीतयोरासनयोरुपविष्टौ । राजा तौ संलापयामास—

**राजा**—किमिदं शिष्योपदेशकाले युगपदाचार्ययोरुपस्थानम् ।

**गणदासः**—देव, श्रूयताम् । मया तीर्थादभिनयविद्या शिक्षिता । दत्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

**राजा**—दृढं जाने । ततः किम् ।

**गणदासः**—सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षं 'अयं न मे पादरजसापि तुल्यः' इत्यधिक्षिप्तः ।

**हरदत्तः**—देव, अयमेव मयि प्रथमं परिवादकरः—अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

**गणदासः**—प्रथमः कल्पः ।

**राजा**—तिष्ठतु तावत् । पक्षपातमत्र देवी मन्यते तत्तस्याः पण्डितकौशिक्या सहितायाः समक्षमेव न्याय्यो व्यवहारः ।

एवं तयोराचार्ययोः कलहेऽव्याजामासक्तिं वहन्निव नृपालो देवीं तत्सख्या पण्डितकौशिक्या सार्धमानेतुं कञ्चुकिनमादिदेश । तस्माच्छ्रुतवृत्तान्ता देवी धारिणी राज्ञस्सकाशमुपसर्पन्ती परिव्राजिकया साकमाचार्योदन्तं विमृशति स्म ।

**देवी**—भगवति, हरदत्तस्य गणदासस्य च सम्रम्भे कथं पश्यसि ।

**परिव्राजिका**—अलं स्वपक्षावसादशङ्कया । न परिहीयते प्रतिद्वन्द्विनो[41] गणदासः ।

**देवी**—यद्येवं तथापि राजपरिग्रहोऽस्य प्रधानत्वमाहरति ।

**परिव्राजिका**—अयि, राज्ञीशब्दभाजनमात्मानमपि तावच्चिन्तयतु भवती ।

इतीव सम्भाषमाणे देवीपरिव्राजिके राजानमुपगत्य वर्धयित्वा[42] तेन च सादरमासनं परिग्राहिते । एवं विदूषकसहायो राजा कौशिकीसहाया देवी विवदमानावाचार्यौ देशकालोचितपरिजनश्च सभां[43] यावदध्यासत तावदवनिपालः केवलमुदासीनमुखभावोऽब्रवीत्—भगवति, अत्रभवतोर्हरदत्तगणदासयोः परस्परविज्ञान-

सङ्घर्षो जातः । तदत्र भगवत्या प्राश्निकपदमध्यासितव्यम् ।

**परिव्राजिका**—(सस्मितम्) अलमुपालम्भेन[44] । पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा ।

**राजा**—मा मैवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिना[45]वनयोरहं देवी च ।

**आचार्यौ**—सम्यगाह देवः । मध्यस्था भगवती गुणदोषौ नः परिच्छेत्तुमर्हति ।

**राजा**—तेन हि प्रस्तूयतां विवादः ।

**परिव्राजिका**—देव, प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण ।

**राजा**—कथं वा देवी मन्यते ।

**देवी**—यदि मां पृच्छसि, एतयोर्विवाद एव न मे रोचते ।

**गणदासः**—न मां देवी समानविद्यतः परिभवनीयमवगन्तुमर्हति ।

**विदूषकः**—भवतु, द्रक्ष्याम उरभ्रसम्पातम्[46] । किं मुधा वेतनदानेन ।

**देवी**—ननु कलहप्रियोऽसि ।

**विदूषकः**—मा तावत् । अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः ।

**राजा**—ननु स्वाङ्गसौष्ठवाभिनयमुभयो[47]र्दृष्टवती भगवती ।

**परिव्राजिका**—अथकिम् ।

**राजा**—तदिदानीमतःपरं किमाभ्यां प्रत्याययितव्यम्[48] ।

**परिव्राजिका**—तदेव वक्तुकामास्मि ।

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था**
**सङ्क्रान्तिरन्यस्य विशेषयुक्ता ।**

यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव[49] ॥ ७ ॥

**विदूषकः**—श्रुतं भगवत्या वचनमार्याभ्याम् । एष पिण्डितार्थः[50] । उपदेशदर्शनेन निर्णय इति ।

**देवी**—यदा पुनर्मन्दमेधा शिष्योपदेशं मलिनयति, तदा आचार्यस्य दोषो नु ।

**राजा**—देवि, एवमापद्यते । विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति[51] ।

इत्थं वादविवादेन प्रस्तुतं कलहं निवारयितुमशक्नुवन्ती स्वपक्ष्यमार्यगणदासमेव 'अलमार्यपुत्रस्य मनोरथं पूरयित्वा' इति जनान्तिकं तर्जयन्ती धारिणी प्रकाशं ब्रूते स्म—'विरम निरर्थकादारम्भात्' इति । देव्या अनुग्रहेण संवर्धितो गणदासस्सर्वथा तां नातिवर्तेतेति विह्वलो विदूषकस्सत्वरमधिचिक्षेप मानिनमाचार्यम्—भो गणदास, सरस्वत्युपायनमोदकान् खादतः किं ते सुलभनिग्रहेण विवादेनेति । सत्यमयमेवार्थो देवीवचनस्येत्यात्मनो वैमनस्यं प्रकटयन्तं गणदासं पुनरप्यनुनयति देवी—अचिरोपनीता वश्शिष्या । अपरिनिष्ठितस्योपदेशस्यान्याय्यं प्रकाशनमिति । 'अत एव मे निर्बन्धः' इत्यकुटिलमतिरात्मगौरवमेव परं मन्यमानो गणदासः । तथाप्यनभिभूता देवी उपायान्तरमाश्रित्य बभाण—तेन हि द्वावपि भगवत्यै उपदेशं दर्शयतमिति । परन्त्वविलम्बमेवाक्षिप्तमस्या वचनं कौशिक्या—नैतन्याय्यम् । सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषायेति । एवमार्यपुत्रपक्षपातमसन्दिग्धं सूचयतानेन कौशिकीवाक्येन पदपरामृष्टा भुजङ्गीव साटोपं सासूयं च परावर्तत धारिणी । राजा कुपितां

देवीं परिव्राजिकायै दर्शयति । परिव्राजिका विलोक्य " अनिमित्तं मा कुप्येन्दुवदने । भर्तृषु प्रभवन्त्योऽपि गृहिण्यः कारणकोपा एव स्युः " इति देवीचित्तमावर्जयन्त्यां[52] कौशिक्यां, विदूषकः पुनरपि चिक्षेप—ननु सकारणादेव । आत्मनः पक्षो रक्षितव्य इति । गणदासं विलोक्य " दिष्ट्या कोपव्याजेन परित्रातो भवान् । सुशिक्षितोऽपि सर्व उपदेशे न निष्णातो भवति " इति । नूनमिदमतीतं क्षमासीमां विशेषतोऽकुतोभयस्य[53] विपश्चिद्वरस्य । अतोऽनन्यगतिरतिक्रान्तसमुदाचारो नृपालसान्निध्यमहत्तामप्यगणयन् प्रतिज्ञातुमुपक्रान्तवान् गणदासः—देवि, एवं जनो गृह्णाति । तदिदानीं—

**विवादे दर्शयिष्यन्तं क्रियासङ्क्रान्तिमात्मनः ।**
**यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥८॥**

इत्यासनात्ससम्भ्रमुदतिष्ठत् । देवी धारिणी मार्गान्तरमपश्यन्ती शिष्यायाः प्रावीण्यं दर्शयितुं गणदासमनुमेने ॥

अथ कस्मिन्नभिनेयवस्तुन्युपदेशं दर्शयिष्यामीत्यनुयुञ्जाने गणदासे, पण्डितकौशिकी धारिणीकोपाद्भीता भीताऽभाणीत्—चतुष्पदोद्भवं चलितं दुष्प्रयोज्यमुदाहरन्ति । तत्रैकार्थसंश्रय[54]मुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्रभवतोरुपदेशान्तरमिति । तथेत्यभ्युपगम्य निष्क्रमितुं प्रवृत्तयोराचार्ययोः, कौशिकी पुनरपि तावाहूय निर्णयाधिकारे आदिदेश । द्वावपि वर्गौ प्रेक्षागृहे सङ्गीतरचनां कृत्वात्रभवतो दूतं प्रेषयतम् । अथवा मृदङ्गशब्द एव नः उत्थापयिष्यतीति । तथेत्युत्तिष्ठति गमनाय हरदत्ते, गणदासः किञ्चिदिव साशङ्कमपि नाम देवी कुपितेति

तस्या मुखं यावदवलोकयत्तावदिङ्गितज्ञा राज्ञी सप्रश्रयं तं व्याजहार—न खलु विजयप्रत्यर्थि[55]न्यहमार्यस्य; विजयी भवेति । आचार्यौ स्वकार्यमनुसृत्य जग्मतुः । सर्वेऽप्यन्ये नाट्यकलाप्रदर्शनमनल्पकौतूहलेन प्रतिपालयन्तः परस्परालापेन कालं निन्युः । "यदि राजकार्येष्वपीदृश्युपायनिपुणतार्यपुत्रस्य तदा शोभनं भवेत्" इति धारिणी भर्तारं प्रणयादभिमानाच्च परिचिक्षेप । राजा च "देवि, अलमन्यथा गृहीत्वा । न खल्विदं मया प्रयुक्तम्" इत्यादि मधुरवचनैस्तां सान्त्वयामास ॥

२

अथ सुविरचितायां सङ्गीतशालायां सवयस्यो नरेन्द्रः, कौशिकीसहाया धारिणी, विभवतश्च परिवारस्समागतः । प्राश्निकपदवीमारूढा परिव्राजिका समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद्गणदासः पुरस्कारमर्हतीत्यभिप्रयन्ती गणदासमेव प्रथमं प्रयोगप्रदर्शनायादिदेश । मालविकादर्शनकातरस्य राज्ञ उत्साहं नियच्छन्नाह गौतमः—भोः ! उपस्थितं नयनमधु ! सन्निहितमक्षिकं च । तदप्रमत्तो भवतु भवानिति । अचिरादेवाचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका सभासमक्षमवततार । "मुक्तसाध्वसा सत्त्वस्था भव" इति वात्सल्यादाचार्येण प्रोत्साह्यमाना रङ्गं प्रविश्योपगानं कृत्वा गायति । तद्यथा—

दुर्लभः प्रियस्तस्मिन् भव हृदय निराशम्
अहो अपाङ्गको मे प्रस्फुरति किमपि वामः[56] ।
एष स चिरदृष्टः कथमुपनेतव्यः
नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ॥ ९ ॥

ात्वा च यथारसमभिनीय विरराम । इमां मधुरतमां गीतिमाकर्ण्य ष्ट्वा चाभिनयविन्यासं विदूषकोऽमन्यत—काव्यमिदं व्याजीकृत्य राज्ञे आत्मानमनन्यशरणा समर्पयति बालेति । कामी राजा च प्रतिपदं प्रत्यङ्गचलनं च स्वतामेव[57] पश्यति । मालविकायां तु राज्ञो मनस्सुदृढं निविष्टम् । यदासौ गीतान्ते निष्क्रमितुमैच्छत्तदा वयस्याभिलाषसमापनैककर्तव्यो विदूषको मालविकां रङ्गे चिरयितुकामः कुशलो दोषज्ञ[58] इव तामेवं निववार—भवति, तिष्ठ किमपि वो विस्मृतः क्रमभेदः । तं तावत्प्रक्ष्यामीति । मालविका निवृत्य स्थिता । साक्षिणी पण्डितकौशिकी राजा च गानमभिनयं च परं प्रशशंसुः । देवी च गणदासोपदेशेन तुष्टा तमभिननन्द । “वदेदानीं यत्ते मनसि वर्तते” इति पृष्टो गौतमः प्रत्युवाच—प्रथमोपदेशदर्शने प्रथमं ब्राह्मणपूजा कर्तव्या । सा ननु वो विस्मृता । इत्यादिभिः परिहासवचनैस्सर्वानहासयत्[59] । मालविका मन्दस्मितं विकिरन्ती भृशमशोभत । पुनरपि विदूषकस्तां विलम्बयितुं किमपि पारितोषिकं दातुकाम इव राज्ञो हस्ताद्यावत्कटकमाकर्षति तावद्गुणान्तरमविमृश्य किमित्याभरणं दीयत इत्याक्षिपद्धारिणी । आचार्यं च विलोक्य “ननु दर्शितोपदेशा वशिष्या” इति स्वकार्यमस्मारयत् । अतो मालविका सहाचार्येण निष्क्रान्ता । “मदीयमिदानीमुपदेशमवलोकयितुं क्रियतां प्रसादः” इति प्रविश्य प्रार्थयमाने हरदत्ते, राजा दाक्षिण्यमवलम्ब्य ननु पर्युत्सुका एव वयमिति व्याहृतवान् । परं तु वैतालिकेनोपारूढो मध्याह्न इति ज्ञापितो हरदत्तस्योपदेशः श्वो द्रष्टव्य इति तं विससर्ज । देवीपरिव्राजिके चान्तःपुरमविशताम् ॥

## ३

अथ कदाचित्परिव्राजिका स्वपरिचारिकां समाभृतिकां

प्रमदवनाद्राज्ञ्युपायनार्थं बीजपूरकमुपाहर्तुमादिदेश[60] । तत्र सम्प्राप्ता सा प्रमदवनपालिकया मधुकरिकया कथाप्रसङ्गेन पृष्टा—तदानीं तावदन्योन्यसङ्घर्षितयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसित इति ।

**समाभृतिका**—द्वावपि किलागमिनौ प्रयोगनिपुणौ च । किं तु शिष्यागुणविशेषणोन्नमितो गणदासः ।

**मधुकरिका**—अथ मालविकागतं कौलीनं किं श्रूयते ।

**समाभृतिका**—बलवत्खलु साभिलाषस्तस्यां भर्ता । केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं न दर्शयति । मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लायमाना लक्ष्यते । अतःपरं न जाने । विसृज माम् ।

**मधुकरिका**—सखि सममेव गच्छावः । अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै विज्ञापयामि ।

एवमुभे प्रस्थिते । एका कौशिकीमुपगता, इतरा च धारिणीम् ॥

अग्निमित्रोऽपि मालविकार्थे दृढमुत्कण्ठते स्म । इरावती प्रथमं वसन्तावतारसूचकानि रक्ताशोककुरबकाण्युपायनं राज्ञे प्रेषयित्वा नववसन्तोत्सवापदेशेन तं निपुणिकामुखेनाभ्यर्थितवती—इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणसुखमनुभवितुमिति । सोऽप्यमुं सन्देशं पुरस्कृत्य सवयस्यः प्रमदवनाय प्रयातः । प्रमदवनमपि तदानीं कामप्यपूर्वां श्रियं दधौ । भूभृतं विलोभयितुकामेव प्रमदवनश्रीर्युवतिवेषलज्जापयितृकं वसन्तकुसुमनेपथ्यमगृह्णात् । तिलककुरबकाशोकादीनि विविधानि विचित्राणि कुसुमानि विकसन्ति स्म ॥

पर्युत्सुका मालविकापि धारिणीनियोगात्तत्रागता। सा तया सन्दिष्टाभूत्—गौतमचापला[61] द्दोलापरिभ्रष्टायास्सरुजौ[62] मे चरणौ। त्वं तावद्गत्वा तपनीयाशोकस्य[63] दोहदं निर्वर्तय। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततोऽहमभिलाषपूरयितृकं वरं दास्यामीति। अनुपदमाव्रजन्तीं तच्चरणालङ्कारहस्तां बकुलावलिकां प्रतिपालयन्ती सा तत्रैव सुकुमारदोहदापेक्षिणोऽशोकवृक्षस्य प्रच्छायशीतले शिलापट्टके निषण्णा सवयस्यस्य नृपतेर्नयनविषयं गता। दैवयोगात्तौ तथादूरे लतान्तरितावर्ततां यथास्या विस्रब्धालापं सर्वमश्रृणुताम्। मालविका मदनेनातिमात्रं सन्तप्ता शंसति स्म—अविज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोऽपि तावल्लज्जे। कुतो विभवः स्निग्धसखीजनस्येमं वृत्तान्तमाख्यातुम्। न जाने अप्रतीकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यति। हृदय, निरवलम्बादतिभूमिलङ्घिनो मनोरथाद्विरम। किं मामायासयसि, इति। राजैतदाकर्ण्यात्मनि बद्धभावा मालविकेति तुतोष॥

अत्रान्तरे प्रविश्य चरणालङ्कारहस्ता बकुलावलिका प्रियसखीमशोकदोहदनिमित्तं नूपुरालक्तकादिभिर्मण्डयन्ती सख्यायाप्यायनानि स्निग्धमधुराणि वचनान्याभाषमाणा तां सुखयति स्म। इदानीमिरावत्यपि चेट्या निपुणिकया साकं तत्र समायाता। निपुणिका बकुलावलिकामशोकपादपच्छायायां मालविकायाश्चरणालङ्कारं निर्वर्तयन्तीं न्यरूपयत्। मालविकां तत्रालोक्य भृशं शङ्कितेरावती॥

चरणस्यैकस्यावसिते रागनिक्षेपे[64] बकुलावलिका मालविकामुवाच—अपि रोचते तेऽयं रागरेखाविन्यासः।

**मालविका**—सखि, आत्मनश्चरणगत इति तावल्लज्जे एन प्रशंसितुम् । केन प्रसाधनकलायामभिविनीतासि ।

**बकुलावलिका**—अत्र खलु भर्तुश्शिष्यास्मि । सखि, अरुण-शतपत्रमिव शोभते ते चरणम् । सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।

मालविकाबकुलावलिकयोरिमां व्याहृतिपरम्परामेकत्र गौतमाग्निमित्रौ अन्यत्र निपुणिकेरावती च विविक्ते शृण्वन्ति स्म । यथा यथा राजा धन्यमात्मानं मन्यते, तथा तथेरावती हताशा कुप्यत्यसूयति च । शृणुत भूयोऽपि वराकिन्यो[65] विस्रब्धालापम्—

**मालविका**—असम्भवं[66] मन्त्रयसे ।

**बकुलावलिका**—मन्त्रयितव्यमेव मन्त्रितम् ।

**मालविका**—प्रिया खल्वहं तव[67] ।

**बकुलावलिका**—न केवलं मम ।

**मालविका**—कस्य वान्यस्य ।

**बकुलावलिका**—गुणेष्वभिनिवेशिनो भर्तुरपि ।

**मालविका**—अलीकं मन्त्रयसे । एतदेव मयि नास्ति ।

**बकुलावलिका**—सत्यं त्वयि नास्ति । भर्तुः कृशपाण्डरेष्वङ्गेषु दृश्यते । अनुरागोऽनुरागेण प्रतीष्टव्य इति सुजनवचनं प्रमाणीकुरु ।

**मालविका**—किमात्मनश्छन्देन मन्त्रयसे[68] ।

**बकुलावलिका**—नहि नहि । भर्तुः खल्वेतानि प्रणयमृदु-कान्यक्षराणि ।

**मालविका**—हला, देवीं चिन्तयित्वा न मे हृदयं विश्वसिति ।

**बकुलावलिका**—मुग्धे, भ्रमरसम्बाध इति वसन्तावतारसर्वस्व-भूतः किं न चूतप्रसवोऽवतंसनीयः[69] ।

**मालविका**—त्वं तावद्दुर्जाते[70] ममात्यन्तसहायिनी भव ।

**बकुलावलिका**—विमर्दसुरभि[71] बकुलावलिका खल्वहम् ॥

इत्येवं सम्भाषमाणयोस्तयोः, मालविकाया द्वितीयोऽपि चरणस्समाप्तपरिकर्माभूत् । ततस्सख्या प्रोत्साहिता रचितपल्लवावतंसा अशोकविकासयितृकं देव्या नियोगं सविलासमन्वतिष्ठत् । निर्गुणोऽयमशोको यदि कुसुमोद्भेदमन्थरो भवेद्य ईदृशं चरणसत्कारं लभत इति सख्याभिनन्दिता च । लीलामेतां पश्यन् प्रतिपदमुपचीयमानमदनबाधो राजा केनापि व्याजेन मालविकां व्याहारयितुमैच्छत् । 'एह्येनां परिहासयिष्यामि' इति वदन् विदूषको राज्ञा सह प्रविश्य मालविकां बकुलावलिकां चाक्षिपत्—भवति, युक्तं नामात्रभवतः प्रियवयस्योऽयं वामपादेन ताडयितुम् । बकुलावलिके, त्वया गृहीतार्थया[72] ईदृशमविनयं कुर्वती किं सखी न निवारिता । श्रुत्वेदं भयाद्वेपमानायां मालविकायां बकुलावलिका—आर्य, देव्या एव नियोगमेषानुतिष्ठति । एतस्मिन्नतिक्रमे परवतीयम् । प्रसीदतु भर्ता' इति निवेद्यात्मना समं सखीं प्रणिपातयामास । 'यद्येवमनपराद्धासि । उत्तिष्ठ भद्रे' इति राजा मालविकां हस्ते गृहीत्वोत्थापयाञ्चक्रे । मालविका लज्जां नाटयन्ती सखीं त्वरयामास—बकुलावलिके, एहि । अनुष्ठितमात्मनो नियोगं देव्यै निवेदयाव इति ।

**बकुलावलिका**—तेन हि विज्ञापय भर्तारं विसर्जय मामिति ।

**राजा**—भद्रे, यास्यसि । मम तावदुत्पन्नावसर[73]मर्थित्वं श्रूयताम् ।

**बकुलावलिका**—अवहिता शृणु । आज्ञापयतु भर्ता ॥

अतिवेलामेतां राज्ञश्चेष्टा[74]श्चाविनयसरणिं स्वयं दृष्ट्वासहमानासूयापरवशेरावती सहसोपसृत्य साटोपमभ्यधात्—पूरय

पूरय । अशोकः कुसुमं दर्शयति न वा । अयं पुनः पुष्प्यति फलति च ; इति । सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः । भूयोऽपि सा भर्त्सयामास — बकुलावलिके, साधु त्वयोपक्रान्तम् । मालविके, त्वं तावत्कुरु सफलप्रार्थनमार्यपुत्रम् । "प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणयपरिग्रहस्य" । इत्युभे ते प्रसादयन्त्यौ निष्क्रान्ते ॥

राजा चेत्थं कर्मगृहीतः कुम्भीलक[75] इव का प्रतिपत्तिरत्रेति चिन्तयन् विदूषकं च त्वरयन् इरावत्या बहुधाधिक्षिप्तः । यथा — अहो ! अविश्वसनीयाः पुरुषाः ! मया खल्वात्मनो वञ्चना, व्याधगीतिरक्तया हरिण्येवाशङ्कितया, न विज्ञाता ।

**राजा**—सुन्दरि, न मे मालविकायां कश्चिदर्थः । मया त्वं चिरायसीति यथाकथञ्चिदात्मा विनोदितः ।

**इरावती**—मया न विज्ञातमीदृशं विनोदवस्तुकमार्यपुत्रेण लब्धमिति । अन्यथा मन्दभागिन्यैवं न क्रियते[76] ।

**विदूषकः**—मा तावत्तत्रभवती तत्रभवतो दाक्षिण्यस्योपरोधं भणतु । समापत्तिदृष्टेन देव्याः परिजनेन सङ्कथापि यद्यपराधः स्थाप्यते, अत्र त्वमेव प्रमाणम् ।

**इरावती**—ननु सङ्कथा नाम भवतु । किमित्यात्मानमायासयिष्ये ।

इति रुषा प्रस्थिता । रशनासन्दानितचरणापि व्रजत्येव । राजा तामनुगच्छन् बहुधा प्रसादयति, पादयोः पतति च । तत्रापि परुषं वक्तीरावती — न खल्विमौ मालविकायाश्चरणौ यौ ते स्पर्शदोहदं पूरयिष्यतः । इति चेट्या सह निष्क्रान्ता । राजा च विदूषकोपदिष्टोऽपचक्राम यावदङ्गारको राशिमिव[77] सानुवक्रं न कुर्यात् ॥

## ४

अथैवमदाक्षिण्येनो[78]द्दीपितकान्ताकोपोऽप्यनास्वादितनववधूसमागमफलोऽतीव पर्युत्सुको राजा मालविकावृत्तान्तज्ञानाय विदूषकं प्रहितवान्। स च प्रत्यागत्य जगाद—तत्रभवत्या मे सख्यास्तु स एव वृत्तान्तो यो बिडालपरिगृहीतायाः परभृतिकायाः। सा खलु तपस्विनी तया पिङ्गलाक्ष्या[79] सारभाण्डगृहे मृत्युमुख इव निक्षिप्ता।

**राजा**—ननु मत्सम्पर्कमुपलभ्य। गौतम, क एवं विमुखोऽस्माकं येन चण्डीकृता देवी।

**विदूषकः**—शृणोतु भवान्। परिव्राजिका मे कथयति। ह्यः किल तत्रभवतीरावती रुजाक्रान्तचरणां देवीं सुखपृच्छिका गता। ततो देव्या सा पृष्टा किं पुनर्लक्षितो वल्लभजन इति। ततस्तयोक्तम्—कुतो वा ते उपचारः, यत्तव परिजनस्य वल्लभत्वं जानन्त्यपि पृच्छसीति। ततस्तयानुबध्यमानया भवतोऽविनयमन्तरेण परिगृहीतार्था कृता देवी। इदानीं किल मालविका बकुलावलिका च निगलवत्यावदृष्टसूर्यपादे[80] पातालवासं नागकन्यके इवानुभवत इति।

**राजा**—कष्टम्। वयस्य, अप्यत्र कस्यचिदुपक्रमस्य गतिस्स्यात्।

**विदूषकः**—कथं भविष्यति। यत्सारभाण्डगृहे व्यापृता माधविका देव्या सन्दिष्टा। ममाङ्गुलीयकमुद्रामदृष्ट्वा न मोक्तव्या त्वयेयं हताशा मालविका बकुलावलिका चेति।

एतदाकर्ण्य राजा निश्वस्य सपरामर्शं गौतमं पुनरन्वयुङ्क्त यदि कश्चिदुपायस्स्यादत्रेति। विदूषको विचिन्त्य सदृष्टिक्षेपमुपश्लिष्य कर्णे 'अस्त्युपायः। स एवमिव' इति निगूढमुपन्यास्थत्[81]॥

अस्मिन्नवसरे प्रतीहारी जयसेनाख्यागत्य देवीगतं वृत्तान्तमकथयत् — देव, प्रवातशयने निषण्णा देवी रक्तचन्दनधारिणा परिजनहस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठतीति । प्रवेशयोग्योऽयमवसर इति जयसेनादिष्टमार्गो राजा प्रवातशयनमभिप्रतस्थे । विदूषकश्च राज्ञीं द्रष्टुमरिक्तपाणिर्भविष्यामीति निष्क्रान्तः । उपचारानन्तरं देवीं कुशलं पृच्छति राजनि, अचिरादेव यज्ञोपवीतबद्धाङ्गुष्ठस्सम्भ्रान्तो विदूषकः प्रविश्य क्रन्दितुमारेभे—परित्रायतां परित्रायताम् । सर्पेण मृत्युना[82] दष्टोऽस्मि, इति । दृष्ट्वेदं सर्वे परं विषण्णाः ।

**राजा**—कष्टम् । क्व भवान् परिभ्रान्तः ।

**विदूषकः**—देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात्प्रमदवनं गतोऽस्मि ।

**देवी**—हा धिक्! हा धिक्! नन्वहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जाता ।

**विदूषकः**—तत्राशोकस्तबककारणात्प्रसारिते मे हस्ते कोटरनिर्गतेन सर्परूपिणा कालेन दष्टोऽस्मि। नन्वेते ते दंशपदे[83] । (इति दर्शयति) ।

**राजा**—सम्प्रति विषवैद्यानां कर्म । जयसेने, क्षिप्रमानीयतां ध्रुवसिद्धिः ।

यद्देव आज्ञापयतीति सा निष्क्रान्ता । विदूषकोऽतिवेदनयाभिभूतो बहुधा प्रलपितुमारब्धः ।

**विदूषकः**—अहो पापेन मृत्युना गृहीतोऽस्मि ।

**राजा**—मा कातरो भूः । अविषोऽपि कदाचिद्दंशो भवेत्[84] ।

**विदूषकः**—कथं न भेष्यामि । सिमसिमायन्ति[85] मेऽङ्गानि ।

इति यावद्विषवेगं रूपयति तावद्धारिणी तमवलम्बितुं परि-

जनमादिशत् । स च तथाकुरुत । विदूषको राजानमवलोक्य—भोः भवतो बाल्याद्वयस्योऽस्मि । तद्विचार्य वृद्धाया अपुत्राया मे जनन्या योगक्षेमं वहेति दैन्येनावदत् । राजा च तमाश्वसयामास—मा भैषीः । अचिरात्त्वां विषवैद्यश्चिकित्सते । स्थिरो भवेति ॥

अत्रान्तरे जयसेनागत्य—देव, ध्रुवसिद्धिर्विज्ञापयति । इहैवानीयतां गौतम इति । तदाकर्ण्य राजाज्ञापयामास—तेन हि तत्रभवतस्सकाशं प्रापयेति । विदूषको देवीमुखं विलोक्य—भवति, जीवेयं वा न वा । यन्मया तत्रभवन्तं सेवमानेन तेऽपराद्धं तन्मर्षयेत्यतिकरुणं प्रार्थयामास । देव्याशशंस—दीर्घायुर्भवेति । राजा च—प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धेरपि यथार्थनाम्नस्सिद्धिं मन्ये इत्यनुचकम्पे ॥

ततो यथानिर्दिष्टं गौतमो वैद्यसकाशं नीतः । जयसेना पुनरागत्य न्यवेदयत्—जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भविधानेन सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यतामिति । अनुपदमेव देवी—इदं सर्पमुद्रितमङ्गुलीयकम् । पश्चान्ममैव हस्ते देह्येतदित्यादिश्याङ्गुलीयकं प्रायच्छत् । कर्मसिद्धा-[86]वाशु प्रतिपत्तिमानयेति राज्ञाज्ञप्ता जयसेना निरगात् । मुहूर्तमात्रेण गौतमः प्रकृतिस्थस्संवृत्त इति वार्तां लब्ध्वामात्येन वाहतकेन प्रार्थितो देवीमामन्त्र्य जगाम जयसेनादिष्टमार्गः । जयसेना गूढेन पथा तं प्रमदवनं प्रापयत् । पथ्येव सन्निपतितो गौतमश्शशंस—वर्धतां भवान् । सिद्धानि ते मङ्गलकर्माणीति । तदनु प्रतीहारीं जयसेनां विसृज्य राजा गौतममुखेन यथा नागमुद्रासनाथेनङ्गुलीयकेन सखीसहाया मालविका बन्धनान्मुक्ता यथा च तत्समागमार्थं समुद्रगृहके स्थापिता तथानुष्ठितामुपायपरिपाटीं सविस्तरं श्रुत्वा तुतोष । प्रशशंस च कुशलमतिकर्माणं[87] प्रियवयस्यम् ।

तत उभावपि तूर्णमेव समुद्रगृहं प्राप्तौ । तत्र कुसुमापचयव्यग्रहस्ता चन्द्रिका नामेरावत्याः परिचारिकानयोर्दर्शनपथमारूढा । तां परिहर्तुमुभौ भित्तिनिगूढौ यावत्पश्यतस्तावद्गवाक्षाद्राज्ञ एव प्रतिच्छन्दं पश्यन्त्यौ मालविकाबकुलावलिके व्यलोकयताम् । सुविस्रब्धाश्चेमे आलापास्तयोर्बालिकयोर्यथा—

**मालविका**—हला, तदाहं सम्मुखस्थिता भर्तू रूपस्य तथा न वितृष्णास्मि यथाद्य मया विभावितश्चित्रगतो भर्ता । हला, कैषा ईषत्परिवर्तितवदना भर्त्रा स्निग्धया दृष्ट्या निध्यायते ।

**बकुलावलिका**—नन्वियं भर्तुः पार्श्वगतेरावती ।

**मालविका**—हला, भर्ता अदक्षिण इव प्रतिभाति यस्सर्वं देवीजनमुज्झित्वा एकस्या मुखे बद्धलक्ष्यः ।

**बकुलावलिका**—हला, भर्तुर्वल्लभैषा ।

**मालविका**—ततः किमिदानीमात्मानमायासयिष्यामि ।

इति यदा सासूयं परावर्तते तदा तस्या भ्रूभङ्गादिकोपविलासं दृष्ट्वा राजा नितरामतुष्यत् । तदनु तस्याः कोपमनुनेष्यन्निव तामुपासर्पत् । बकुलावलिका विदूषकश्च बालाशोकवृक्षपल्लवलङ्घिनं[88] हरिणं निवारयितुमिव तस्माद्देशादपासरताम् ॥

अस्मिन्नवसरे कुसुमापचयव्यग्रया चन्द्रिकया निपुणिका, तन्मुखेन चेरावती विज्ञापिता समुद्रगृहालिन्दे आर्यगौतम एकाकी दृष्ट इति । इरावतीदमाकर्ण्य संशया[89]न्मुक्तं भर्तुः पियवयस्यं प्रेक्षितुं, चित्रगतं भर्तारं च प्रसादायितुं तत्रैव गमनाय मतिं चकार । यदा च चेट्या सह तत्र गच्छति तदा दुर्दैवान्मालविकायाः पुनरपि रहस्यभेदस्समजायत । सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः । भूयोऽपि राजा तां वृथा प्रसादयति । निपुणिका-

मुखेन मालविकाबन्धमोक्षादिवृत्तान्तं श्रुत्वा खिद्यमानायामिरावत्यां जयसेनागत्य—देव, कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती पिङ्गलवानरेण बलवत्त्रासिताङ्कनिषण्णा देव्याः प्रवातकिसलय[90]मिव वेपमाना, इदानीमपि प्रकृतिं न प्रतिपद्यत इति सावेगं व्यजिज्ञपत्। वार्तयानयेरावतीमुखास्सर्वे विषण्णाः कुमारीमाश्वासयितुं निर्गताः। मालविका देवीं चिन्तयित्वा वेपमानहृदयातःपरं किं वा भवितव्यमिति चिन्ताक्रान्ता यावत्तिष्ठति तदा शुश्रावाशरीरां वाणीम्—आश्चर्यमाश्चर्यम्। अपूर्ण एव पञ्चरात्रे दोहदस्य, मुकुलैस्सन्नद्धस्तपनीयाशोक इति। शुभामिमां गिरं निशम्योभे परां तुष्टिं प्रापतुः॥

## ५

अद्य खलु राज्ञोऽग्निमित्रस्य भवने महानुत्सवः। इच्छाम्यार्यपुत्रेण सहाशोकस्य प्रसूनलक्ष्मीं प्रत्यक्षीकर्तुमिति देवी धारिणी भर्तारं चेटीमुखेन प्रार्थितवती। यथानर्थास्तथा भद्राण्यपि सङ्घचारिणीति भाति[91]। यतोऽस्मिन्नेव समये विदर्भविषयात्पूर्वपरिचितेन वीरसेनेन स्वस्रे धारिण्यै पत्रं प्रेषितं यस्यायं सारांशः—वशीकृतो वीरसेनप्रमुखैर्भर्तुर्विजयदण्डैर्विदर्भनाथः। [92]मोचितश्चास्य दायादो माधवसेनः। तेन महासाराणि रत्नवाहनानि शिल्पकारिकाभूयिष्ठं परिजनं चोपायनीकृत्य भर्तुस्सकाशं प्रेषितो दूतः श्वः किल भर्तारं द्रक्ष्यतीति। अन्यच्च सेनापतिः पुष्पमित्रो विजिताखिलपरिपन्थी अश्वमेधेन यष्टुकामो यज्ञतुरगरक्षणे नप्तारं कुमारं वसुमित्रं नियुक्तवानिति श्रुत्वा तदाप्रभृति तस्यायुषो निमित्तमष्टादशसुवर्णप्रमाणां दक्षिणां देवी दक्षिणीयैः प्रतिग्राहयति॥

रजा पुनर्विदर्भपतिमानमितं श्रुत्वापि, सुलभेतरसम्प्रयोगां कान्तां विचिन्त्य विमनायमानो विदूषकेणैवमाश्वासितः—अद्य

देव्या धारिण्या पण्डितकौशिकी भणिता—भगवति, यदि त्वं प्रसाधनगर्वं वहसि, तद्दर्शय मालविकायाश्शरीरे वैदर्भं विवाहनेपथ्यम्' इति । तयापि सविशेषालङ्कृता मालविका । तत्रभवती कदापि पूरयति भवतो मनोरथमिति । राजा च स्वापेक्षानुवृत्त्या[92] निवृत्तेर्ष्याया धारिण्याः पूर्वचरितैस्सम्भाव्यमेतदिति वयस्योक्तौ विश्वासमधत्त ॥

तदनु मालविकापुरोगेणात्मनः परिजनेन परिव्राजिकया च साकं देवी धारिणी तपनीयाशोकपरिसरे देवं प्रतिपालयतीति प्रतीहार्या जयसेनायाश्श्रुत्वा सवयस्यस्तत्र गन्तुं तत्वरे । देवीपरिजनमध्यगता मालविकापि वैवाहिकनेपथ्येनात्यन्तं शोभमाना कौतुकालङ्कारस्य निमित्तं जानन्त्यपि बिसिनीपत्रगतं सलिलमिव वेपमानं हृदयं कथंचित्समाश्वासयति स्म । अथेदानीं प्राप्तं महाराजं देवी धारिणी सपरिवारा प्रत्युत्थाय कृतोपचारा सुखासने यावदुपवेशयति तावन्मौद्गल्यः कञ्चुकी प्रविश्यामात्यवचनमावेदयांचकार—देव, तस्मिन् विदर्भराजोपायने द्वे शिल्पदारिके मार्गपरिश्रमादलघुशरीरे इति कृत्वा न प्रवेशिते । सम्प्रति देवोपस्थानयोग्ये । तत्राज्ञां देवो दातुमर्हतीति । तदनु राजाज्ञया प्रवेशिते ते प्रणिपत्योपाविशताम् । भूमिपालोऽपृच्छत्—कस्यां कलायामभियोगो[93] भवत्योः ।

**उभे**—भर्तः सङ्गीते अभ्यन्तरे[94] स्वः ।

**राजा**—देवि, गृह्यतामन्यतरा ।

**देवी**—मालविके, इतः पश्य कतरा ते सङ्गीतसहायिनी रोचते । अथेदानीमुभे ते दारिके मालविकां विलोक्य—अहो भर्तृदारिका । जयतु भर्तृदारिकेति वदन्त्यौ तया सह बाष्पं विससृजतुः । सर्वे सविस्मयमालोकयांचक्रिरे । राज्ञानुयुज्यमाने शिल्पदारिके कथां कथयामासतुः—शृणोतु भर्ता । योऽसौ भर्त्रा विजयदण्डैर्विदर्भनाथं

वशीकृत्य बन्धनान्मोचितो माधवसेनो नाम, तस्येयं भगिनी कनीयसी मालविका नाम । दायादवशं गतेऽस्माकं भर्तृदारके माधवसेने तस्यामात्येनार्यसुमतिनास्मादृशं परिजनमुज्झित्वा गूढमपनीतैषा । एतावदेव जानीवः । इति ॥

अतः परमहं मन्दभागिनी कथयिष्यामीति परिव्राजिका पण्डितकौशिकी वक्तुमारब्धा—श्रूयताम् । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ । स इमां तथागतभ्रातृकां[95] मया सार्धमपवाह्य भवत्सम्बन्धापेक्षया पथिकसार्थं वैदिशगामिनमनुप्रविष्टः । ततश्च सहसाविरभूदापातदुष्प्रसहं कोदण्डपाणि प्रतिरोधकानामनीकम् । ततो मुहूर्तं बद्धयुद्धास्ते पराङ्मुखीकृतास्सार्थवाहयोद्धारः । ततस्स मत्सोदर्यः—

**इमां परिप्सु[96]र्दुर्जाते पराभिभवकातराम् ।**
**भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः[97] ॥ १० ॥**

ततो मोहं गताहं यावत्संज्ञामुपालभे तावदियं दुर्लभदर्शना संवृत्ता । ततो भ्रातुश्शरीरमग्निसात्कृत्वा पुनर्नवीकृतवैधव्यदुःखया[98] मया त्वदीयं देशमवतीर्येमे काषाये गृहीते । सेयमाटविकेभ्यो वीरसेनं, वीरसेनाद्देवीं गता, देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टेत्यवसानं कथायाः । इत्यनवसितवचनायामेव कौशिक्यां धारिण्याचिक्षेप— भगवति, त्वयाभिजनवतीं मालविकामनाचक्षाणयासाम्प्रतं[99] कृतम् । परिव्राजिका समर्थयामास—शान्तं पापं शान्तं पापम् । कारणेनैव खलु मया नैभृत्य[100]मवलम्बितम् । श्रूयताम् । इयं पितरि जीवति केनापि देवयात्रागतेन सिद्धादेशेन साधुना मत्समक्षमादिष्टा ‘संवत्सरमात्रं प्रेष्यभावमनुभूय ततस्सदृशभर्तृगामिनी भविष्यति’

इति । तमेनमवश्यंभाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया साधु कृतमिति पश्यामि । इति । वृत्तमिदं निशम्य मालविकाविषये तदानीमेव तपनीयशोकदोहदेनावर्जितमानसा [101] धारिणीदानीमधिकतरां बहुमेन इति पुनरुक्तिः ॥

अथ मौद्गल्यः कञ्चुक्युवाच—देव, कथान्तरेणान्तरितमिदममात्यो विज्ञापयति—विदर्भगतमनुष्ठेयमवधारितोऽस्माभिः । देवस्य तावदभिप्रायं श्रोतुमिच्छामीति । राजा प्रत्यभाषत—मौद्गल्य, तत्रभवतोर्भ्रात्रोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमवस्थापयितुकामोऽस्मि ।

**तौ पृथग्वरदाकूले शिष्टा [102] मुत्तरदक्षिणे ।**
**नक्तं दिवं विभज्योभौ शीतोष्णकिरणाविव [103] ॥ ११ ॥**

इतीदं राज्ञोऽभिमतं मन्त्रिपरिषदे विज्ञापयित्वा पुनरागत्य सप्रणामं निवेदयाञ्चकार—विजयतां देवः । अमात्यो विज्ञापयति 'अहो ! कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदोऽप्येवमेव दर्शनम् [104] ' । इति । पुनरादिदेश राजा—तेन हि मन्त्रिपरिषदं ब्रूहि—सेनापतये वीरसेनाय लिख्यतामेवं क्रियतामिति ॥

एतस्मिन्नन्तरे देवस्य सेनापतेः पुष्पमित्रस्य सकाशात्सप्राभृतको [105] लेखः प्राप्तः । राजा सहसोत्थाय प्राभृतकं सोपचारं गृहीत्वा शिरसि कृत्वा च परिजनायार्पयामास । लेखं चोद्वेष्ट्योपविश्य च वाचयामास यथा—स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजसूययज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं गोप्तारं वसुमित्रमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः, स सिन्धोर्दक्षिणे रोधसि चरन्नश्वानीकेन

यवनानां प्रार्थितः । तत उभयोस्सेनयोर्महानासीत्सम्मर्दः ।

**ततः परान् पराजित्य वसुमित्रेण धन्विना ।**
**प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥ १२ ॥**

सोऽहमिदानीमंशुमतेव सगरः [106] पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा [107] भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ॥

इतीमां शुभां वार्तामाकर्ण्य सर्वे सभाजयामासू राजानं देवीं च । विशेषतः परिव्राजिका देवीमभिननन्द—

**भर्तासि वीरपत्नीनां श्लाघ्यायां स्थापिता धुरि ।**
**वीरसूरिति शब्दोऽयं तनयात्त्वामुपस्थितः ॥ १३ ॥**

इति । राजा मौद्गल्यमाहूय कुमारविजयजनितानन्देन यज्ञसेनस्यालमुररीकृत्य[108] मुच्यन्तां सर्वे बन्धनस्था इत्याज्ञापयामास। धारिण्या तु प्रागेव तपनीयोशोकदोहदप्रसङ्गे मालविकां राज्ञे प्रदातुं सङ्कल्पितमभूत् । अद्य तु तामभिजनवतीं ज्ञात्वातिवेलेन हर्षेण तथा कर्तुं सा प्रावर्तत । इरावत्यपि वृत्तान्तमखिलं विज्ञाय विगतासूया धारिणीसङ्कल्पमन्वमन्यत ; भर्तृप्रसादनरूपं सन्देशं च प्राहिणोत् । तदनु भगवत्या पण्डितकौशिक्यानुज्ञाता परिजनसमक्षमवनीन्द्रं व्याजहार—इदमार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छत्विति । नितान्तं सन्तुष्टान्तरङ्गो राजा—देवि, त्वच्छासनादप्रत्युत्तरा वयमिति सबहुमानं सव्रीडं च मालविकापाणिमगृह्णात् । सर्वे ननन्दुः । विजयी राजा चिरं सुखं राज्यं शशास ॥

**सर्वे कुशलिनस्सन्तु सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिच्छोकमाप्नुयात् ॥ १४ ॥**

---

# ಶ್ರೀಮಹೀಶೂರ–ಜನಪದ–ಸಂಪದಭಿವರ್ಣನಮ್

ಈ ಪುಟ್ಟ ಚಂಪೂಗ್ರಂಥವನ್ನು ಬರೆದವರು ಶ್ರೀಮಾನ್ ಆಸ್ಥಾನ ಮಹಾವಿದ್ವಾನ್ ಕರೂರು ಶೇಷಾಚಾರ್ಯರೆಂಬ ಕವಿವರ್ಯರು. ಇವರು ಶ್ರೀಮನ್ಮಹಾರಾಜ ಸಂಸ್ಕೃತಮಹಾಪಾಠಶಾಲೆಯಲ್ಲಿ ಜ್ಯೋತಿಶ್ಶಾಸ್ತ್ರಪ್ರಧಾನೋಪಾಧ್ಯಾಯರಾಗಿದ್ದಾರೆ. ಉದ್ದಾಮವಿದ್ವಾಂಸರ ಸಂತತಿಯಲ್ಲಿ ಜನಿಸಿ ಜ್ಯೋತಿಶ್ಶಾಸ್ತ್ರದಲ್ಲಿಯೂ ಸಾಹಿತ್ಯದಲ್ಲಿಯೂ ಉತ್ತಮವಾದ ಸಂಪ್ರದಾಯಾನುಸಾರ ಶಿಕ್ಷೆಯನ್ನು ಪಡೆದು ಈಗ ಮೈಸೂರಿನ ವಿದ್ವದ್ಗೋಷ್ಠಿಯಲ್ಲಿ ಅಗ್ರಗಣ್ಯರಾಗಿರುವರು. ಕವಿತೆಯಲ್ಲಿ ಇವರಿಗಿರುವ ನೈಸರ್ಗಿಕವಾದ ಅಭಿನಿವೇಶ, ಸ್ವಾತಂತ್ರ್ಯ ಮತ್ತು ಚಾತುರ್ಯ ಮುಂತಾದ ಗುಣಾತಿಶಯಗಳು ಮೇಲ್ಕಂಡ ಚಂಪೂಗ್ರಂಥದಿಂದ ಇಲ್ಲಿ ಆರಿಸಿರುವ ಕೆಲವು ಶ್ಲೋಕಗಳಲ್ಲಿಯೂ ಕಂಡುಬರುತ್ತವೆ. ಶ್ರೀಮಾನ್ ಶೇಷಾಚಾರ್ಯರ ಕವನಗಳನೇಕ ಶ್ರೀಮನ್ಮಹಾರಾಜ ಸಂಸ್ಕೃತಮಹಾಪಾಠಶಾಲಾ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾಗಿವೆ.

ಪ್ರಕೃತಗ್ರಂಥವು ನಮ್ಮ ದೇಶದ ಸಂಪದಭಿವೃದ್ಧಿಯನ್ನು ವರ್ಣನೆ ಮಾಡುವುದಾಗಿದೆ. ನವೀನಪ್ರಗತಿಸೂಚಕವಾದ ಅನೇಕ ಸಂಸ್ಥೆಗಳು, ಚಿಕಿತ್ಸಾಲಯಗಳು, ವ್ಯವಸಾಯವ್ಯವಸ್ಥೆಗಳು, ಶಿಲ್ಪಕಾರ್ಯಗಳು, ವಿದ್ಯಾ ಪ್ರಚಾರ, ರಾಜಕೀಯ ಯೋಗಕ್ಷೇಮ ಮುಂತಾದ ಸರ್ವತೋಮುಖವಾದ ಏರ್ಪಾಡುಗಳು ಅನ್ಯೂನಾತಿರಿಕ್ತವಾಗಿ ಸ್ತುತಿಸಲ್ಪಟ್ಟಿವೆ.

# श्रीमहीशूर–जनपद–सम्पदभिवर्णनम्

---

श्रीवाहास्यसुधासदृक्षशिशिरत्रैलोक्यतापापह-
स्निग्धस्वादुदिशाविसृत्वरकराङ्कूराशिश्रयं चामिताम् ।
दीर्घायुर्नयसम्पदं विदधतां श्रीकृष्णभूमीशितुः
सौजन्यादिगुणाम्बुधेर्बुधकविस्तोमामरद्रोः प्रभोः[109] ॥१॥

भूम्याये विपुलेऽपि तृप्तिमभजंच्छ्रीकृष्णराजस्सुधीः
बध्वा सह्यसुतां दृढं हृदयुतं कल्पेऽप्यशोष्यं जलम् ।
सम्मेल्यास्य मुखे स्वनामघटितां कृत्वा विभुस्सागरा-
भिख्यां तत्प्रसृतैर्गभीरसलिलैरुर्वीं तनोत्युर्वराम् [110] ॥२॥

इदंकृष्णक्ष्मेशाम्बुनिधिवरसेतोरध इदम्
मनोज्ञं चोद्यानं लसति बत बृन्दावनमिति ।
तदध्यास्ते रम्या स्वकरकलशामन्दाविगल-
द्धनस्वच्छासारा कनकसरितोऽस्याः प्रतिकृतिः[111] ॥ ३ ॥

नानावर्णनिमग्नवैद्युतकनदीपांशुभिः कुत्रचि-
न्नीलैः कुत्रचन स्थले च हरितैरन्यत्र रक्तैर्भृशम् ।
स्थानेऽन्यत्र निशासमैश्च कुहचिच्चित्रांशुभिर्निर्झरै-
र्वेशन्तैः प्रमदावनं च रुचिरं बाभाति मोदावहम्[112] ॥४॥

लाभज्ञाग्रिमकृष्णभूपमणिना सह्यात्मजानिर्झरा-
धःपातस्यदभूमतश्शिवसमुद्राह्वस्थले साधितैः ।
विद्युद्दीपगणैर्धनायातिरसङ्ख्यातात्र विष्वक् पुरे
चामुण्डागिरिमूर्ध्नि च प्रकालितैरन्यस्थलेष्वद्भुतैः[113] ॥ ५

इदंजनपदोल्लसत्प्रथितहृद्यहेमाकर-
प्रजातकनकेष्टकाविभवतोऽभिधाभूद्भुवः ।
ऋतैव वसुधेत्युदीरितचरी कृतीन्द्रैरहो
न विश्वसिति कः पुमान् विषयमेनमुक्तं भुवि[114] ॥ ६ ॥

चेलादीनां रुचिरवयनं पेषणं तण्डुलादे-
र्व्रीह्यादीनामवहतिररं नैकधा रुच्यपाकः ।
अश्मोत्क्षेपश्शिखरिदलनं पाथसा वर्त्मसेक-
स्तैलादानं शकटगमनं संस्कृतिर्भूषणानाम्[115] ॥ ७ ॥

यथास्थानस्थित्याकलनबहुखेदापनयनम्
सिराणां व्यस्तानां शिशिरमरुदापादनसुखम् ।
अयस्कर्मानेकं वपनमिदमाद्यास्सुमतिभिः
क्रियास्सन्तन्यन्ते तटिदुदितयन्त्रैर्नवनवाः[116] ॥ ८ ॥

प्रजाप्रतिनिधीन् प्रजाभवुकलोलकृष्णप्रभु-
र्नियोज्य बहुषु स्थलेष्वधिकृतीरमीषां पुनः ।
वितीर्य कुतुकादिदंजनपदीयकोशादिम-
प्रविस्तृतविचारणास्वपि महीं प्रशास्त्यादरात्[117] ॥ ९ ॥

कां चिन्न्यायविमर्शनामकसभां निर्माय तादृक्सभा-
लोकानामथ राजकीयविषयक्षोदाधिकारान् दिशन् ।

तद्गोष्ठीं च नयन् प्रजाप्रतिनिधिप्रख्यातसंसज्जनान्
कृष्णेन्द्रस्तनुते कियन्ति जनतासाह्यान्यहो प्रेमतः[118] ॥

यस्यां पुर्यां समन्ताद्बहुविधविलसद्रम्यभूयिष्ठविद्यु-
द्दीपैर्दृष्ट्वा त्रियामां दिवससमदशामध्वसन्दृश्यसूचीम् ।
के न ब्रूयुस्तमीति प्रथितमिह मृषा नाम तस्या विशाल-
श्लक्ष्णानोयानयोग्यामितविमलतमैरध्वभिर्भासुरायाम्[119]॥

क्वचिद्वीणागानं क्वचन मृदुगीतं च वदनैः
क्वचिद्गीतं वाद्यैः क्वचन मुरलीगानमतुलम् ।
क्वचिद्गीतिः कुम्भैः क्वचन पटहाद्यैस्सहकृतम्
विचित्रं गानं च प्रतिदिनमहो यत्र नगरे[120] ॥ १२ ॥

यक्ष्मा रोगाधीश्वरस्सङ्क्रमोत्थो
माभूदित्थं सूक्ष्मयालोच्य दृष्ट्या ।
अस्याः पुर्याः पश्चिमे दिग्विभागे
दूरे बद्धस्तच्चिकित्सानिवेशः[121] ॥ १३ ॥

स्वान्येषु भारतमहीपतिषु प्ररूढात्
प्रेम्णोऽधिकं निहितमात्मनि सार्वभौम्या ।
प्रेम प्रकाशयितुमत्र ततान कृष्णो
विक्टोरियावरचिकित्सितवेश्म भूपः[122] ॥ १४ ॥

पुरातनचिकित्सितक्रममनेककालाच्छ्लथं
तदङ्गखलदूषितं मितधनप्रसाध्यं शुभम् ।
व्यधादवितुमादराद्बुधवरैरतन्द्रैर्नवै-
र्भृशं नृपतिरायुषो निगमवैद्यशालां वराम्[123] ॥ १५ ॥

शैलेष्वष्टेन्दुसङ्ख्ये शकनृपसमये भाववर्षेषमासे
पुर्यामत्रोदितायां गणकपरिषदः प्रार्थनां हन्त कृत्वा ।
स्वान्ते प्राचीनजीर्णग्रहगणितसमीकारलोलेन राज्ञा
प्रक्रान्ता बद्धमेतद्गिरिशिरसि महायन्त्रशाला खगानाम्[124] ॥

अत्रोपकार्यां ललिताद्रिनाम्नीम्
निर्माप्य शैले क्षितिपाल एषः ।
तदा तदाध्युष्य च तामुपास्ते
देवीं जगन्मातरमेकतानः[125] ॥ १७ ॥

इदंपुराधिकोल्लसन्मनोज्ञशौरिमन्दिरा-
द्बहिर्दिनाष्टकं दिनात्पराच्च तज्जनैः ।
जगत्पतेर्गवां व्रजैश्चलन् महस्तु वार्षिकः
स्थलान्तरे न लोकितश्चिरं ब्रवीमि तस्य किम्[126] ॥ १८ ॥

श्रीविष्णुवर्धनमहीपतिमौलिक्लृप्त-
वेलापुराभरणसुन्दरकेशवस्य ।
विश्वातिशायिबहुलानघपुत्रिकौघं
हृद्यं गृहं लसति सम्प्रति संस्कृतं तत्[127] ॥ १९ ॥

संस्कारितैर्यवनसौगतजैनजीर्ण-
देवालयैरपि मतेष्वखिलेषु तुल्यम् ।
दृष्टिं प्रकाशयति सन्मतिकृष्णभूपः
सन्तस्समानधिषणास्सकलेषु लोके[128] ॥ २० ॥

श्रीचामभूपतिलके जनके स्वकीये
कार्तज्ञ्यमाकलयितुं निहिता तदीया ।

मध्येचतुष्पथममन्दमुदं दुहाना
रम्या वरा प्रतिकृतिर्नृपशेखरेण [129] ॥ २१ ॥

भल्लूकैश्शिखिभिश्शुकैर्वनमृगैः कोलैर्लुलायैर्मृगैः
शार्दूलैश्शुनकैर्वृषैश्च सरटैस्सर्पैस्सृगालैर्वृकैः ।
मार्जारैर्जलदन्तिभिर्जलनरैर्ग्राहैर्झषैराखुभिः
सिंहैर्नैकविधैः पिकैरपि परैश्शाला वृता राजते [130] ॥ २२ ॥

अहो इह पुरे वरे प्रतिसमं धराधीशितु-
र्महाजनिदिनोत्सवे बुधवरा हि सोष्णीषकाः ।
मनोज्ञवसनाश्रिताः धृतफलाश्शुभाशीर्युतैः
शुभाक्षतचयैः किरन्त्यवनिपालकं मूर्धनि [131] ॥ २३ ॥

नानारूपविचित्रवैद्युतमहादीपांशुभिः प्रोज्वल-
न्नानारत्नमहार्घहारकिरणैर्ज्योत्स्नासमुत्तम्भितैः ।
नागस्कन्धविमानरत्नरुचिभिश्चारञ्जनैः कृच्छ्रतो
दृश्यं कृष्णमहीपतिं दिविचरं नूनं वयं मन्महे [132] ॥ २४ ॥

पुरेऽत्र निरमाय्यसौ रुचिरविश्वविद्यालयः
प्रभूतधनराशिजः कुशलकृष्णभूमभृता ।
गृहेऽत्र महतीं प्रथां गतवतां कलासम्भवाम्
प्रशस्य बिरुदं मुदा प्रतिसमं ध्रुवं दीयेत [134] ॥ २५ ॥

कार्यागारेऽत्र भित्तौ विनिहितफलकं प्रौढकक्ष्यापरीक्ष्याः
भव्याभव्यावबोधं द्रुततरगतयस्सङ्घशो वीक्ष्य शिष्याः ।

नोत्तीर्णाः केऽप्यनागस्कृतमपि सततं स्वं परीक्षानियुक्तम्
मौख्यान्निन्दन्ति केचिद्विधिहतकविधिं तादृशास्स्वं
[ब्रुवान्ति[135] ॥ २६ ॥

केचित्ते स्वं शपन्ति प्रगुणसमुचितप्रश्नयोग्योत्तराज्ञम्
धून्वन्तस्स्वं कराग्रं कतिचन विपुलस्वव्ययात्ते रुदन्ति ।
उत्तीर्णा दैवयोगात्सुरगुरुसदृशं मन्वते केऽपि शिष्याः
स्वं स्वश्लाघाप्रवीणा लघुतरमृदुलश्मश्रु हस्तैस्स्पृशन्तः[136] ॥

राजा गेहे स्वकीये सुरभणितिमहाप्रेमभाजां बुधानाम्
मासे मासे यथार्हं निरुपहति मुदा स्पर्शनाद्वेतनस्य ।
सङ्ख्या पुर्याममुष्यां विलसति महती पण्डितानां समृद्धि-
र्नैतादृक्षा व्यलोकि क्वचन जनपदे स्पष्टमेतत्समेषाम्[137] ॥

श्रीमद्भास्करगोलयन्त्रविविधप्राचीनकोशानघ-
श्रीदन्तीन्द्रमुखैः प्रसूनलतिकाजालैर्वरैश्चम्पकैः ।
छात्राणां निलयैस्तृणौघहरितालिन्दैश्च कक्ष्यागणै-
रिन्धे निर्जरभारतीनिवसतिः कृष्णेन्द्रभूपादृता[138] ॥ २९ ॥

वधूनां निर्मातुं रुचिरतमविद्याकुशलताम्
महाराज्ञी प्राज्ञी व्यतनुत विशालां दृढतराम् ।
कलाशालां तस्यां प्रतिसममनेकास्सुदतयः
परीक्षासु प्रौढास्वपि दधति काष्ठां परतराम्[139] ॥ ३० ॥

इहत्या वामाक्ष्यः पठनलिखितग्रन्थरचनै-
र्विदेशप्रस्थानैर्बहुविधपरीक्षावितरणैः ।

चिकित्साकौशल्यादिभिरपि हि पुंसामपि समाः
स्त्रियाः पुंवद्भावं तत उदितवान् पाणिनिमुनिः [140] ॥

प्रजावनसमुत्सुकैर्नयविदाग्रिमैर्मन्त्रिभिः
नयेन परिपालयन् धरणिमोजसामाकरः ।
अभङ्गुरदयानिधेर्यदुपतेर्दशा वत्सरान्
शतं यदुकुलोद्भवो जयतु कृष्णभूमीश्वरः [141] ॥ ३२ ॥

# ದೂತವಾಕ್ಯಮ್

---

ಕವಿವರೇಣ್ಯನಾದ ಭಾಸನು ಈ ರೂಪಕವನ್ನು ರಚಿಸಿದನೆಂದು ನಂಬಲಾಗಿದೆ. ಮಹಾಭಾರತದ ಕಥೆಯಲ್ಲಿ ಘೋರಯುದ್ಧವಾಗುವುದಕ್ಕೆ ಮುಂಚೆ ಅನೇಕ ಸಂಧಿಪ್ರಯತ್ನಗಳು ನಡೆದವು; ಸಫಲವಾಗಲಿಲ್ಲ. ಕೊನೆಗೆ ಶ್ರೀ ಕೃಷ್ಣನೇ ಸಾಕ್ಷಾತ್ತಾಗಿ ಕೌರವರ ಪಾಳೆಯವನ್ನು ಪ್ರವೇಶಿಸಿ ಉಭಯಪಕ್ಷಗಳ ಮೇಲ್ಮೆಗಾಗಿ ಸಾಹಸಪಡುವನು ; ಅವನೂ ಕೃತಕೃತ್ಯನಾಗಲಿಲ್ಲ— ಎಂಬೀ ಪ್ರಕರಣವು ದೂತವಾಕ್ಯದ ಕಥಾವಸ್ತು.

ಕವಿಕುಲೋತ್ತಂಸನಾದ ಕಾಳಿದಾಸನೇ ತನ್ನ ಗ್ರಂಥದಲ್ಲಿ ಭಾಸನ ಯಶಸ್ಸನ್ನು ಕೊಂಡಾಡಿರುವನಾದರೂ,[142] ಈ ಮಹಾಕವಿಯ ಗ್ರಂಥಗಳು ಇತ್ತೀಚಿನವರೆಗೆ ಲಭಿಸಿರಲಿಲ್ಲ. ಕ್ರಿ ಶ. 1910ರಲ್ಲಿ ತಿರುವಾಂಕೂರಿನಲ್ಲಿ ಪ್ರಸಿದ್ಧರಾಗಿದ್ದ ಗಣಪತಿಶಾಸ್ತ್ರಿಗಳೆಂಬ ಪಂಡಿತೋತ್ತಮರು ಹದಿಮೂರು ರೂಪಕಗಳನ್ನು ಪತ್ತೆಮಾಡಿ ಅವೆಲ್ಲವೂ ಭಾಸಪ್ರಣೀತಗಳೆಂದು ಸಮರ್ಥಿಸಿದರು. ಸಾಮಾನ್ಯವಾಗಿ ನಾಟಕದ ಪ್ರಸ್ತಾವನೆಯಲ್ಲಿ ಕವಿಗಳು ತಮ್ಮ ಮತ್ತು ತಮ್ಮ ಗ್ರಂಥದ ಪರಿಚಯಮಾಡಿಕೊಡುವುದು ಪದ್ಧತಿ. ಆದರೆ ಈ ಹೊಸ ನಾಟಕಚಕ್ರದಲ್ಲಿ ಯಾವುದರಲ್ಲಿಯೂ ಕವಿಯ ಹೆಸರು ಹೇಳಲ್ಪಟ್ಟಿಲ್ಲ. ಆದುದರಿಂದ ಈ ಹದಿಮೂರು ನಾಟಕಗಳನ್ನು ಭಾಸಕವಿಯೇ ಬರೆದನೇ ಎಂಬ ಬಲವಾದ ಶಂಕೆಯು ಹುಟ್ಟಿ ಈಗಲೂ ಕೆಲವರು ಭಾಸಪ್ರಣೀತವೆಂಬುದನ್ನು ಒಪ್ಪುವುದಿಲ್ಲ. ಅಂತೂ ಈ ನಾಟಕಗಳಲ್ಲಿ ಉಪಯೋಗಿಸಲ್ಪಟ್ಟಿರುವ ಸ್ಥಾಪನೆ, ಭರತವಾಕ್ಯ, ಭಾಷೆ, ಶೈಲಿ ಮುಂತಾದುವುಗಳಲ್ಲಿ ಪರಸ್ಪರ ಸಾಮ್ಯವಿರುವುದರಿಂದ ಇವುಗಳೆಲ್ಲವನ್ನೂ ಒಬ್ಬನೇ ರಚಿಸಿದನೆಂದು ನಂಬಬಹುದು. ಮತ್ತು ಈ ರೂಪಕಗಳಲ್ಲೊಂದಾದ ಸ್ವಪ್ನವಾಸವದತ್ತವೆಂಬುದು ಭಾಸಕೃತವೆಂದು ರಾಜಶೇಖರಾದಿಗಳು ನಿರ್ದೇಶಮಾಡಿರುವುದರಿಂದ ಹದಿಮೂರು ರೂಪಕಗಳೂ ಭಾಸಕೃತಗಳೇ ಎಂದೂ ನಂಬಬಹುದಾಗಿದೆ. ಈ ಕವಿಯು ಸುಮಾರು ಕ್ರಿ.ಶ. 300 ರಲ್ಲಿದ್ದನೆಂದು ಕೆಲವರು ಅಭಿಪ್ರಾಯಪಡುತ್ತಾರೆ.

ಭಾಸಮಹಾಕವಿಯನ್ನು ಕಾಳಿದಾಸನಲ್ಲದೆ, ಬಾಣಭಟ್ಟ,[143] ರಾಜಶೇಖರ,[144] ವಾಕ್ಪತಿರಾಜ,[145] ಜಯದೇವ,[146] ಭಾಮಹ, ವಾಮನ, ಅಭಿನವಗುಪ್ತ ಮುಂತಾದ ಕವೀಶ್ವರರೂ ಆಲಂಕಾರಿಕರೂ ಸ್ಮರಿಸಿದ್ದಾರೆ. ಭಾಸ

ನಾಟಕಚಕ್ರದಲ್ಲಿ ಸ್ವಪ್ನವಾಸವದತ್ತವು ಅತ್ಯುತ್ತಮವಾದುದು. ಈ ನಾಟಕಗಳ ಕಥಾವಸ್ತು ರಾಮಾಯಣ, ಮಹಾಭಾರತ, ಭಾಗವತ, ಬೃಹತ್ಕಥೆಗಳಿಂದ ತೆಗೆದುಕೊಂಡದ್ದಾಗಿದೆ. ಭಾಸನು ಲಾಕ್ಷಣಿಕರ ವಶನಾಗದೆ ಸ್ವತಂತ್ರ ಮಾರ್ಗವನ್ನನುಸರಿಸಿ ಶ್ಲಾಘ್ಯವಾದ ರೂಪಕಸಮುದಾಯದಿಂದ ಲೋಕರಂಜನೆಯನ್ನುಂಟುಮಾಡಿರುವನು.

ದೂತವಾಕ್ಯವು ಏಕಮಾತ್ರಾಂಕವಾದ ವ್ಯಾಯೋಗವೆಂಬ[147] ರೂಪಕವಿಶೇಷವೆಂದು ಹೇಳಬಹುದು. ಶ್ರೀಕೃಷ್ಣಸಂಧಾನವೇ ಇದರ ವಿಷಯವೆಂದು ಮೇಲೆ ಹೇಳಿದೆ. ಭಾರತದಲ್ಲಿ ಕಾಣುವ ಯುವರಾಜಕುಮಾರನಾದ ದುಷ್ಟ ದುರ್ಯೋಧನನು ಇಲ್ಲಿ ಕವಿಯ ಕೌಶಲದಿಂದ ದರ್ಪವುಳ್ಳ ಮಹಾರಾಜ. ಮೂರ್ಖತನ, ದೌರಾತ್ಮ್ಯ ಇವು ಅವನಿಗೆ ಸಹಜವಾದರೂ ರಾಜನೀತಿಯನ್ನು ಚನ್ನಾಗಿ ಬಲ್ಲವನು. ರಾಜ್ಯವೆಂಬುದು ಬಾಹುಬಲದಿಂದ ಸಂಪಾದಿಸತಕ್ಕುದೇ ಹೊರತು ಯಾಚಿಸಿ ಪಡೆಯುವುದಲ್ಲ. ಏಕಾದಶಾಕ್ಷೌಹಿಣೀ ಬಲಸಮುದಯವು ಅವನ ವಿಜಯಕ್ಕೆ ನೆರವಾಗಿದ್ದಿತು. ಭೀಷ್ಮ ದ್ರೋಣ ಮೊದಲಾದ ವೀರರೂ ಧರ್ಮಜ್ಞರೂ ಅವನ ಆಜ್ಞಾಧಾರಕರು. ಶ್ರೀಕೃಷ್ಣನು ಸಾರ್ವತ್ರಿಕವಾಗಿ ಪಡೆದಿದ್ದ ಗೌರವವನ್ನು ದುರ್ಯೋಧನನು ಸಹಿಸಲಾರ. ಎಲ್ಲರಹಾಗೆ ಮನುಷ್ಯನಾದ ಕೇಶವನು ಪುರುಷೋತ್ತಮನು ಹೇಗಾದಾನು? ಶಕ್ತಿ ಸಾಮರ್ಥ್ಯ ಭಾಗ್ಯ ಮುಂತಾದ ಸಂಪತ್ತುಗಳಲ್ಲಿ ಅವನು ದುರ್ಯೋಧನನ್ನು ಮೀರಿಸಲಾಗುವುದೇ? ಲೋಕವು ಅವನನ್ನು ವೃಥಾ ಪೂಜಿಸುತ್ತದೆ. ನೋಡೋಣ, ಸಮಯವನ್ನು ನಿರೀಕ್ಷಿಸಿ ಅವನನ್ನು ಸೆರೆಹಿಡಿದರೆ ಆಯಿತು ಪಾಂಡವರ ಆಟ—ಈ ಪರಿಯಾದ ಆವೇಶವುಳ್ಳವನಾಗಿ ತಕ್ಕ ಶಿಕ್ಷೆಯನ್ನು ಹೊಂದಿದರೂ ಒಟ್ಟಿನಲ್ಲಿ ದುರ್ಯೋಧನನು ಈ ರೂಪಕದಲ್ಲಿ ತೇಜೋಮಯನಾಗಿ ಚಿತ್ರಿತನಾಗಿದ್ದಾನೆ.

ಮೂಲಗ್ರಂಥದಲ್ಲಿ ಸ್ವಲ್ಪಮಾತ್ರ ವ್ಯತ್ಯಾಸಮಾಡಿ ಈ ರೂಪಕವನ್ನು ಇಲ್ಲಿ ಅಚ್ಚುಹಾಕಲಾಗಿದೆ. ರಂಗಸ್ಥಳದಲ್ಲಿ ಅಭಿನಯಿಸುವುದಕ್ಕೆ ಬಹಳ ಯೋಗ್ಯವೆಂದು ಅನುಭವವುಳ್ಳವರು ಹೇಳುತ್ತಾರೆ.

# पात्राणि

| | | |
|---|---|---|
| दुर्योधनः | .... .... | धृतराष्ट्रस्य ज्येष्ठः पुत्रः |
| वासुदेवः | .... .... | श्रीकृष्णः |
| सुदर्शनः | .... ... | श्रीकृष्णचक्रायुधाभिमानी देवः |
| धृतराष्ट्रः | ... .... | पाण्डोर्ज्येष्ठभ्राता |
| काञ्चुकीयः | .... .... | दुर्योधनभृत्यः |

अन्ये च भीष्म-द्रोण-शकुनि-कर्ण-वैकर्ण-चर्षदेवादिक्षत्रिय महत्तराः राजसभासदः ॥

# दू त वा क्य म्

( सङ्गृहीतम् )

---

(नान्द्यन्ते [148] ततः प्रविशति सूत्रधारः)

**सूत्रधारः—**

**पादः पायादुपेन्द्रस्य सर्वलोकोत्सवस्स वः ।**
**व्याविद्धो नमुचि[149]र्येन तनुताम्रनखेन[150] खे ॥ १ ॥**

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो भोः प्रतिहाराधिकृताः ! महाराजो दुर्योधनस्समाज्ञापयति—

**सूत्रधारः**—भवतु, विज्ञातम् ।

**उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैस्सह ।**
**मन्त्रशालां रचयति भृत्यो दुर्योधनाज्ञया ॥ २ ॥**

(निष्क्रान्तः)

**स्थापना** [151]

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः**—भो भोः प्रतिहाराधिकृताः! महाराजो दुर्योधन-स्समाज्ञापयति — "अद्य सर्वपार्थिवैस्सह मन्त्रयितु-मिच्छामि तदाहूयन्तां सर्वे राजानः" इति। (परिक्रम्याव-लोक्य) अये अयं महाराजो दुर्योधन इत एवाभिवर्तते। य एषः—

**श्यामो युवा सितदुकूलकृतोत्तरीयः**
**सच्छत्रचामरवरो रचिताङ्गरागः।**
**श्रीमान् विभूषणमणिद्युतिरञ्जिताङ्गः**
**नक्षत्रमध्य इव पर्वगतश्शशाङ्कः[152] ॥ ३ ॥**

(ततः प्रविशति यथानिर्दिष्टो दुर्योधनः)

**उद्भूतरोषमिव मे हृदयं सहर्षम्**
**प्राप्तं रणोत्सवमिमं सहसा विचिन्त्य।**
**इच्छामि पाण्डवबले वरवारणानाम्**
**उत्कृत्तदन्तमुसलानि[153] मुखानि कर्तुम् ॥ ४ ॥**

**काञ्चुकीयः**—जयतु महाराजः। महाराजशासनात् समानीतं सर्वराजमण्डलम्।

**दुर्योधनः**—सम्यक् कृतम्। प्रविश त्वमवरोधनम्।

**काञ्चुकीयः**—यदाज्ञापयति महाराजः।

(निष्क्रान्तः)

**दुर्योधनः**—आर्यौ! वैकर्णवर्षदेवौ[154]! उच्यताम् — अस्ति ममैकादशाक्षौहिणीबलसमुदयः। अस्य कस्सेनापतिर्भवितु-

मर्हतीति । किमाहतुर्भवन्तौ—महान् खल्वयमर्थः[155] । मन्त्रयित्वा वक्तव्यमिति ।

सदृशमेतत् । तदागम्यतां मन्त्रशालामेव प्रविशामः । आचार्य! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । पितामह! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । आर्यौ वैकर्णवर्षदेवौ! प्रविशतां भवन्तौ । भो भोस्सर्वक्षत्रियाः! स्वैरं प्रविशन्तु भवन्तः । वयस्य कर्ण! प्रविशावस्तावत् ।

(प्रविश्य)

आचार्य! एतत् कूर्मासनं, आस्यताम् । पितामह! एतत्सिंहासनं, आस्यताम् । मातुल! एतच्चर्मासनं, आस्यताम् । आर्यौ! वैकर्णवर्षदेवौ! आसातां भवन्तौ। भो भोस्सर्वक्षत्रियाः! स्वैरमासतां भवन्तः ।

किमिति किमिति । महाराजो नास्त इति । अहो सेवाधर्मः[156] । नन्वयमहमासे । वयस्य कर्ण! त्वमप्यास्स्व ।

(उपविश्य)

आर्यौ वैकर्णवर्षदेवौ! उच्यताम्—अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कस्सेनापतिर्भवितुमर्हतीति ।

किमाहतुर्भवन्तौ । अत्रभवान् गान्धारराजो[157] वक्ष्यतीति । भवतु, मातुलेनाभिधीयताम् ।

किमाह मातुलः । अत्रभवति गाङ्गेये स्थिते कोऽन्यस्सेनापतिर्भवितुमर्हतीति । सम्यगाह मातुलः । भवतु भवतु । पितामह एव भवतु । वयमप्येतदभिलषामः ।

सेनानिनादपटहस्वनशङ्खनादैः
चण्डानिलाहतमहोदधिनादकल्पैः ।
गाङ्गेयमूर्ध्नि पतितैरभिषेकतोयैः
सार्धं पतन्तु हृदयानि नराधिपानाम्[158] ॥ ५ ॥

(प्रविश्य)

**काञ्चुकीयः**—जयतु महाराजः । एष खलु पाण्डवस्कन्धावारादौत्येनागतः पुरुषोत्तमो नारायणः ।

**दुर्योधनः**—मा तावद्भो बादरायण ! किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः ? स गोपालकस्तव पुरुषोत्तमः ? बार्हद्रथापहृतविषयकीर्तिभोग[159]स्तव पुरुषोत्तमः ? अहो पार्थिवासन्नमाश्रितस्य भृत्यजनस्य समुदाचारः । सगर्वं खल्वस्य वचनम् । आ अपध्वंस ।

**काञ्चुकीयः**—प्रसीदतु प्रसीदतु महाराजः । सम्भ्रमेण समुदाचारो विस्मृतः । (पादयोः पतति)

**दुर्योधनः**—सम्भ्रम इति । आ मनुष्याणामस्त्येव सम्भ्रमः । उत्तिष्ठोत्तिष्ठ ।

**काञ्चुकीयः**—अनुगृहीतोऽस्मि ।

**दुर्योधनः**—इदानीं प्रसन्नोऽस्मि । क एष दूतः प्राप्तः ।

**काञ्चुकीयः**—दूतः प्राप्तः केशवः ।

**दुर्योधनः**—केशव इति । एवमेष्टव्यम्[160] । अयमेव समुदाचारः । भो भो राजानः ! दौत्येनागतस्य किं युक्तम् । किमाहुर्भवन्तः—अर्घ्यप्रदानेन पूजयितव्यः केशव इति । न मे रोचते । ग्रहणमस्यात्र हितं पश्यामि ।

ग्रहणमुपगते तु वासुभद्रे
हृतनयना इव पाण्डवा भवेयुः ।
गतिमतिरहितेषु पाण्डवेषु
क्षितिरखिलापि भवेन्ममासपत्ना[161] ॥ ६ ॥

अपि च योऽत्र केशवस्य प्रत्युत्थास्यति, स मया द्वादशसुवर्णभारेण दण्ड्यः । तदप्रमत्ता भवन्तु भवन्तः । (आत्मगतम्) को नु खल्विदानीं ममाप्रत्युत्थानस्योपायः । हन्त ! दृष्ट उपायः । (प्रकाशम्) बादरायण ! आनीयतां स चित्रपटो ननु, यत्र द्रौपदीकेशाम्बराकर्षणमालिखितम् । (आत्मगतम्) तस्मिन् दृष्टिविन्यासं कृत्वा नोत्थास्यामि केशवस्य ।

**काञ्चुकीयः**—यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) जयतु महाराजः । अयं स चित्रपटः ।

**दुर्योधनः**—ममाग्रतः प्रसारय ।

**काञ्चुकीयः**—यदाज्ञापयति महाराजः । (प्रसारयति)

**दुर्योधनः**—अहो दर्शनीयोऽयं चित्रपटः । एष दुश्शासनो द्रौपदीं केशहस्ते गृहीतवान् । एषा खलु द्रौपदी—

दुश्शासनपरामृष्टा सम्भ्रमोत्फुल्ललोचना ।
राहुवक्त्रान्तरगता चन्द्रलेखेव शोभते ॥ ७ ॥

एष दुरात्मा भीमः सर्वराजसमक्षमवमानितां द्रौपदीं दृष्ट्वा प्रवृद्धामर्षः सभास्तम्भं तुलयति[162] । एष युधिष्ठिरः—

सत्यधर्मघृणायुक्तो द्यूतविभ्रष्टचेतनः ।
करोत्यपाङ्गविक्षेपैश्शान्तामर्षं वृकोदरम् ॥ ८ ॥

एष इदानीमर्जुनः—

रोषाकुलाक्षः स्फुरिताधरोष्ठः
तृणाय मत्वा रिपुमण्डलं तत् ।
उत्सादयिष्यन्निव सर्वराज्ञः
शनैस्समाकर्षति गाण्डिवज्याम् ॥ ९ ॥

एष युधिष्ठिरोऽर्जुनं निवारयति । एतौ नकुलसहदेवौ—

कृतपरिकरबन्धौ चर्मनिस्त्रिंशहस्तौ
परुषितमुखरागौ स्पष्टदष्टाधरोष्ठौ ।
विगतमरणशङ्कौ सत्वरं भ्रातरं मे
हरिमिव मृगपोतौ[163] तेजसाभिप्रयातौ ॥ १० ॥

एष युधिष्ठिरः कुमारावुपेत्य निवारयति—

निचोऽहमेव विपरीतमतिः कथं वा
रोषं परित्यजतमद्य नयानयज्ञौ ।
द्यूताधिकारमवमानममृष्यमाणाः
सत्त्वाधिकेषु वचनीयपराक्रमास्स्युः[164] ॥ ११ ॥

इति । एष गान्धारराजः—

अक्षान् क्षिपन् स कितवः प्रहसन् सगर्वम्
सङ्कोचयन्निव मुदं द्विषतां स्वकीर्त्या ।

स्वैरासनो द्रुपदराजसुतां रुदन्तीम्
काक्षेण पश्यति लिखत्यपि गां नयज्ञः[165] ॥१२॥

एतावाचार्यपितामहौ तां दृष्ट्वा लज्जायमानौ पटान्तान्तर्हितमुखौ [166] स्थितौ । अहो अस्य वर्णाढ्यता । अहो भावोपपन्नता [167] । अहो युक्तलेखता । सुव्यक्तमालिखितोऽयं चित्रपटः । प्रीतोऽस्मि । कोऽत्र ।

**काञ्चुकीयः**—जयतु महाराजः ।

**दुर्योधनः**—बादरायण ! आनीयतां स विहगवाहनमात्रविस्मितो[168] दूतः ।

**काञ्चुकीयः**—यदाज्ञापयति महाराजः । (निष्क्रान्तः)

**दुर्योधनः**—वयस्य ! कर्ण !

प्राप्तः किलाद्य वचनादिह पाण्डवानाम्
दौत्येन भृत्य इव कृष्णमतिस्स कृष्णः ।
श्रोतुं सखे त्वमपि सज्जय कर्ण कर्णौ
नारीमृदूनि वचनानि युधिष्ठिरस्य [169] ॥ १३ ॥

(ततः प्रविशति वासुदेवः काञ्चुकीयश्च)

**वासुदेवः**—अद्य खलु धर्मराजवचनात् धनञ्जयाकृत्रिममित्रतया चाहवदर्पमनुक्तग्राहिणं सुयोधनं प्रति मयाप्यनुचितदौत्यसमया[170]ऽनुष्ठितः । इदं सुयोधनशिबिरम् । इह हि—

आवासाः पार्थिवानां सुरपुरसदृशास्स्वच्छन्दविहिताः
विस्तीर्णाश्शस्त्रशाला बहुविधकरणै[171]श्शस्त्रैरुपाचिताः ।

हेषन्ते मन्दुरस्थास्तुरगवरघटा बृंहन्ति करिणः
ऐश्वर्यं स्फीतमेतत्स्वजनपरिभवादासन्नविलयम् ॥ १४ ॥

भोः—

दुष्टवादी गुणद्वेषी शठस्स्वजननिर्दयः ।
सुयोधनो हि मां दृष्ट्वा नैव कार्यं करिष्यति ॥ १५ ॥

भो बादरायण ! किं प्रवेष्टव्यम् ।

**काञ्चुकीयः**—अथकिमथकिम् । प्रवेष्टुमर्हति पद्मनाभः ।

**वासुदेवः**—(प्रविश्य) कथं कथं मां दृष्ट्वा सम्भ्रान्ताः सर्वे-क्षत्रियाः । अलमलं सम्भ्रमेण । स्वैरमासतां भवन्तः ।

**दुर्योधनः**—कथं कथं केशवं दृष्ट्वा सम्भ्रान्ताः सर्वक्षत्रियाः । अलमलं सम्भ्रमेण । स्मरणीयः पूर्वमाश्रावितो दण्डः । नन्वहमाज्ञप्ता ।

**वासुदेवः**—(उपगम्य) भोः सुयोधन ! किमास्से[172] ।

**दुर्योधनः**—(आसनात्पतित्वा आत्मगतम्) सुव्यक्तं प्राप्त एव केशवः ।

उत्साहेन मतिं कृत्वाप्यासीनोऽपि समाहितः ।
केशवस्य प्रभावेन चलितोऽस्म्यासनादहम् ॥ १६ ॥

अहो बहुमायोऽयं दूतः । (प्रकाशम्) भो दूत ! एतदासनमास्यताम् ।

**वासुदेवः**—आचार्य ! आस्यताम् । गाङ्गेयप्रमुखा राजानः ! स्वैरमासतां भवन्तः । वयमप्युपविशामः । (उपविश्य) अहो दर्शनीयोऽयं चित्रपटः । मा तावत् । द्रौपदीकेशाम्बराकर्षणमत्रालिखितम् । अहो तु खलु—

सुयोधनोऽयं स्वजनावमानम्
पराक्रमं पश्यति बालिशत्वात् ।
को नाम लोके स्वयमात्मदोष-
मुद्घाटयेन्नष्टघृणस्सभासु ॥ १७ ॥

आः अपनीयतामेष चित्रपटः ।

**दुर्योधनः**— बादरायण ! अपनीयतां किल चित्रपटः ।

**काञ्चुकीयः**—यदाज्ञापयति महाराजः । (अपनयति)

**दुर्योधनः**—भो दूत !

धर्मात्मजो वायुसुतश्च भीमो
भ्रतार्जुनो मे त्रिदशेन्द्रसूनुः ।
यमौ च तावश्विसुतौ विनीतौ
सर्वे सभृत्याः कुशलोपपन्नाः [173] ॥ १८ ॥

**वासुदेवः**—सदृशमेतद्गान्धारीपुत्रस्य । अथकिमथकिम् । भवतो राज्ये शरीरे बाह्याभ्यन्तरे[174] च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादयः पाण्डवाः ।

अनुभूतं महद्दुःखं सम्पूर्णस्समयस्स[175] च ।
अस्माकमपि धर्म्यं यद्दायाद्यं तद्विभज्यताम् ॥ १९ ॥
इति ।

**दुर्योधनः**—कथं कथं दायाद्यमिति । भोः—

वने पितृव्यो मृगयाप्रसङ्गतः
कृतापराधो मुनिशापमाप्तवान् [176] ।

तदाप्रभृत्येव स दारनिःस्पृहः
परात्मजानां पितृतां कथं व्रजेत् ॥ २० ॥

वासुदेवः—पुराविदं भवन्तं पृच्छामि—

विचित्रवीर्यो विषयी विपत्तिम्
क्षयेण यातः पुनराम्बिकायाम्[177] ।
व्यासेन जातो धृतराष्ट्र एषः
लभेत राज्यं जनकः कथं ते ॥ २१ ॥

मा मा भवानेवम् ।

एवं परस्परविरोधविवर्धनेन
शीघ्रं भवेत्कुरुकुलं नृप नामशेषम् ।
तत्कर्तुमर्हसि भवानपकृष्य रोषम्
यत्त्वां युधिष्ठिरमुखाः प्रणयाद्ब्रुवन्ति ॥ २२ ॥

दुर्योधनः—भो दूत! न जानाति भवान् राज्यव्यवहारम् ।

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न च पुनर्दीनाय वा दीयते ।
काङ्क्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसम्
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं[178] शमायाश्रमम् ॥ २३

वासुदेवः—भोः सुयोधन! अलमलं बन्धुजने परुषमभिधातुम्

पुण्यसञ्चयसम्प्राप्तामधिगम्य नृपश्रियम् ।
वञ्चयेद्यः सुहृद्बन्धून् स भवेद्विफलश्रमः ॥ २४ ॥

दुर्योधनः—भो दूत !

स्यालं तव गुरोर्भूपं कंसं प्रति न ते दया ।
कथमस्माकमेवं स्यात्तेषु नित्यापकारिषु ॥ २५ ॥

वासुदेवः—अलं तन्मद्दोषतो[179] ज्ञातुम् ।

कृत्वा पुत्रवियोगार्तां बहुशो जननीं मम ।
वृद्धं स्वपितरं बद्ध्वा हतोऽयं मृत्युना स्वयम् ॥२६॥

दुर्योधनः—सर्वथा वञ्चितस्त्वया कंसः । अलमात्मस्तवेन । न शौर्यमेतत् । पश्य—

जामातृनाशव्यसनाभितप्ते
　रोषाभिभूते मगधेश्वरेऽथ ।
पलायमानस्य भयातुरस्य[180]
　शौर्यं तदेतत् क्व गतं तवासीत् ॥ २७ ॥

वासुदेवः—देशकालावस्थापेक्षि[181] खलु शौर्यं नयानुगामिनाम् । इह तिष्ठतु तावदस्मद्गतः परिहासः । स्वकार्यमनुष्ठीयताम् ।

कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतराः[182] ।
सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि ॥ २८

दुर्योधनः—

देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत् ।
पिष्टपेषणमेतावत् पर्याप्तं छिद्यतां कथा[183] ॥ २९ ॥

वासुदेवः—(आत्मगतम्)

प्रसाद्यमानैस्सामभिर्नायं न स्वभावं विमुञ्चति ।
हन्त सङ्क्षोभयाम्येनं वचोभिः परुषाक्षरैः ॥ ३० ॥

(प्रकाशम्) भोः सुयोधन! किं न जानीषेऽर्जुनस्य बल-
पराक्रमम् ।

दुर्योधनः—न जाने ।

वासुदेवः—भोः श्रूयताम् ।

कैरातं वपुरास्थितः पशुपतिर्युद्धेन सन्तोषितः
वह्नेः खाण्डवमश्नतस्सुमहती वृष्टिश्शरैश्छादिता ।
देवेन्द्रार्तिकरा निवातकवचा नीताः क्षयं लीलया
नन्वेकेन तदा विराटनगरे भीष्मादयो निर्जिताः[184] ॥३१॥

अपि च तवापि प्रत्यक्षनपरं कथयामि ।

ननु त्वं चित्रसेनेन नीयमानो नभस्तलम् ।
विक्रोशन् घोषयात्रायां फल्गुनेनैव मोक्षितः[185] ॥३२

किं बहुना—

दातुमर्हसि मद्वाक्याद्राज्यार्धं धृतराष्ट्रज ।
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः ॥

दुर्योधनः—कथं कथम् । हरिष्यन्ति हि पाण्डवाः ।

प्रहरति यदि युद्धे मारुतो भीमरूपी
प्रहरति यदि साक्षात् पार्थरूपेण शक्रः ।

परुषवचनदक्ष! त्वद्वचोभिर्न दास्ये
तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये ॥ ३४ ॥

वासुदेवः—भोः कुरुकुलकलङ्कभूत! अयशोलुब्ध! वयं किल तृणान्तराभिभाषकाः[186] ।

दुर्योधनः—भो गोपालक! तृणान्तराभिभाष्यो भवान् ।

अवध्यां प्रमदां हत्वा हयं गोवृषमेव च ।
मल्लानपि मुनिर्लज्जो वक्तुमिच्छसि साधुभिः[187] ॥ ३५ ॥

वासुदेवः—भोः सुयोधन! ननु क्षिपसि माम् ।

दुर्योधनः—ननु सत्यमेवैतत् ।

वासुदेवः—गच्छामि तावत् ।

दुर्योधनः—गच्छ गच्छ पशुखुरोद्धूतरेणुरूषिताङ्गो व्रजमेव[188] । विफलीकृतः कालः ।

वासुदेवः—एवमेवास्तु । न वयमनुक्तसन्देशा गन्तुमिच्छामः । तदाकर्ण्यतां युधिष्ठिरस्य सन्देशः ।

दुर्योधनः—आः अभाष्यस्त्वम् ।

अहमवधृतपाण्डरातपत्रः
द्विजवरहस्तधृताम्बुसिक्तमूर्धा ।
अवनतनृपमण्डलानुयात्रैः
सह कथयामि भवद्विधैर्न भाषे ॥ ३६ ॥

वासुदेवः—न व्याहरति मां किल सुयोधनः । भोः—

शठ! वान्धवनिःस्नेह! काक! केकर! पिङ्गल!
त्वदर्थात् कुरुवंशोऽयमचिरान्नाशमेष्यति ॥ ३७ ॥

भो भो राजानः! गच्छामस्तावत् ।

**दुर्योधनः**—कथं यास्यति किल केशवः । दुश्शासन! दुर्मर्षण! दुर्मुख! दुर्बुद्धे! दुष्टेश्वर! दूतसमुदाचारमतिक्रान्तः केशवो बध्यताम् । कथमशक्ताः । दुश्शासन! न समर्थः खल्वसि । अयमशक्तः । मातुल! बध्यतामयं केशवः । कथं पराङ्मुखः पतति । भवतु, अहमेव पाशैर्बध्नामि ।

(पाशमुद्यम्योपसर्पति)

**वासुदेवः**—कथं बद्धुकामो मां किल सुयोधनः । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि ।

(विश्वरूपमास्थितः)

**दुर्योधनः**—भो दूत!

**सृजसि यदि समन्ताद्देवमायास्स्वमायाः**
**प्रहरसि यदि वा त्वं दुर्निवारैस्सुरास्त्रैः ।**
**हयगजवृषभाणां पातनाज्जातदर्पो**
**नरपतिगणमध्ये बध्यसे त्वं मयाद्य ॥ ३८ ॥**

आः तिष्ठेदानीम् । कथं न दृष्टः केशवः । अयं केशवः । अहो ह्रस्वत्वं केशवस्य । आः तिष्ठेदानीम् । कथं न दृष्टः केशवः । अयं केशवः । अहो दीर्घत्वं केशवस्य । कथं न दृष्टः केशवः । अयं केशवः । सर्वत्र मन्त्रशालायां केशवा भवन्ति । किमिदानीं करिष्ये । भवतु, दृष्टम् । भो भो राजानः! एकेनैकः केशवो बध्यताम् । कथं स्वयमेव पाशैर्बद्धाः पतन्ति राजानः । साधु भो जम्भक! साधु!

मत्कार्मुकोदरविनिस्सृतबाणजालै-
र्विद्धं क्षरत्क्षतजरञ्जितसर्वगात्रम् ।
पश्यन्तु पाण्डुतनयाश्शिचिरोपनीतम्
त्वां बाष्परुद्धनयनाः परिनिश्वसन्तः ॥ ३९ ॥

(निष्क्रान्तः)

वासुदेवः—भवतु, पाण्डवानां कार्यमहमेव साधयामि । भोः सुदर्शन! इतस्तावत् ।

(ततः प्रविशति सुदर्शनः)

सुदर्शनः—एष भोः! ।

श्रुत्वा गिरं भगवतो विपुलप्रसादा
न्निर्धावितोऽस्मि परिवारिततोयदौघः ।
कस्मिन् खलु प्रकुपितः कमलायताक्षः
कस्याद्य मूर्धनि मया प्रविजृम्भितव्यम्[189] ॥ ४० ॥

क नु खलु भगवान्नारायणः । (विलोक्य) अये अयं भगवान् हस्तिनपुरद्वारे दूतसमुदाचारेणोपस्थितः । (उपसृत्य) जयतु भगवान्नारायणः । (प्रणमति) ।

वासुदेवः—सुदर्शन! अप्रतिहतपराक्रमो भव । दिष्ट्या भवान् कर्मकाले प्राप्तः ।

सुदर्शनः—अनुगृहीतोऽस्मि । आज्ञापयतु भवानाज्ञापयतु—

किं मेरुमन्दरकुलं परिवर्तयामि
सङ्क्षोभयामि सकलं मकरालयं वा ।

नक्षत्रवंशमखिलं भुवि पातयामि
नाशक्यमास्ति मम देव! तव प्रसादात् ॥ ४१ ॥

**वासुदेवः**—भोः सुदर्शन! इतस्तावत्। भोः सुयोधन!

यदि लवणजलं वा कन्दरं वा गिरीणाम्
ग्रहगणचरितं वा वायुमार्गं प्रयासि।
मम भुजबलयोगप्राप्तसञ्जातवेगम्
भवतु चपल! चक्रं कालचक्रं तवाद्य ॥ ४२ ॥

**सुदर्शनः**—भोः सुयोधनहतक! तिष्ठ तिष्ठ। (पुनर्विचार्य) प्रसीदतु भगवान्नारायणः—

महीभारापनयनं कर्तुं जातस्य[190] भूतले।
अस्मिन्नेवं गते देव! ननु स्याद्विफलः श्रमः ॥४३॥

**वासुदेवः**—रोषात् समुदाचारो नावेक्षितः। गम्यतां स्वनिलयमेव।

**सुदर्शनः**—यदाज्ञापयति भगवान्नारायणः। कथं कथं गोपालक इति। त्रिचरणातिक्रान्तत्रिभुवनो[191] नारायणः खल्वत्रभवान्। शरणं व्रजन्तु भवन्तः। यावद्गच्छामि। अये एतानि भगवदायुधवराणि प्राप्तानि। अयं भगवतो वरवाहनं गरुडः प्राप्तः। अयि भोः! प्रशान्तरोषो भगवान् देवदेवेशः। गम्यतां स्वनिलयमेव। हन्त निवृत्ताः। यावदहमपि कान्तां मेरुगुहामेव यास्यामि।

(निष्क्रान्तः)

वासुदेवः—यावदहमपि पाण्डवशिबिरमेव यास्यामि ।

(नेपथ्ये)

न खलु न खलु गन्तव्यम् ।

वासुदेवः—अये वृद्धराजस्वर इव । भो राजन्! एष स्थितोऽस्मि ।

(ततः प्रविशति धृतराष्ट्रः)

धृतराष्ट्रः—क नु खलु भगवान्नारायणः । क नु खलु भगवान् पाण्डवश्रेयस्करः । क नु खलु भगवान् देवकीनन्दनः ।

**मम पुत्रापराधात्तु शार्ङ्गपाणे! तवाधुना ।**
**एतन्मे त्रिदशाध्यक्ष! पादयोः पतितं शिरः ॥४४॥**

वासुदेवः—हा धिक् । पतितोऽत्रभवान् । उत्तिष्ठोत्तिष्ठ ।

धृतराष्ट्रः—अनुगृहीतोऽस्मि । भगवन्! इदमर्घ्यं पाद्यं च प्रतिगृह्यताम् ।

वासुदेवः—सर्वं गृह्णामि । किं ते भूयः प्रियमुपहरामि ।

धृतराष्ट्रः—यदि मे भगवान् प्रसन्नः, किमतःपरमिच्छामि ।

वासुदेवः—गच्छतु भवान् पुनर्दर्शनाय ।

धृतराष्ट्रः—यदाज्ञापयति भगवान्नारायणः । (निष्क्रान्तः)

(भरतवाक्यम्)[192]

**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।**
**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ ४५ ॥**

(निष्क्रान्ताः सर्वे)

दूतवाक्यं समाप्तम्

# लघुटिप्पणी।

## विद्यासम्प्रदायः

1 "**न हि ज्ञानेन सदृशम्**" ಇದು ನಮ್ಮ ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯದ ಧ್ಯೇಯ ಅಥವಾ ಪ್ರತಿಜ್ಞೆ.

2 **विद्या**—ವೇದಗಳು ನಾಲ್ಕು, ವೇದಾಂಗಗಳು ಆರು, ಅಲ್ಲದೆ ಪುರಾಣ, ನ್ಯಾಯ, ಮೀಮಾಂಸಾ ಮತ್ತು ಧರ್ಮಶಾಸ್ತ್ರ ಈ ಹದಿನಾಲ್ಕು ವಿಷಯಗಳ ಜ್ಞಾನವು ವಿದ್ಯೆಯೆಂದು ಪ್ರಾಚೀನರು ಲಕ್ಷಣವನ್ನು ಹೇಳಿದ್ದಾರೆ. ಈ ವಿದ್ಯೆಗೆ ಅಧಿಕಾರಿ ಯಾರು? ಅವನ ಗುಣ ಹೇಗಿರಬೇಕು? ಎಂಬುದನ್ನು ಈ ನಾಲ್ಕು ಮಂತ್ರಗಳು ಪ್ರತಿಪಾದಿಸುವುವು.

ಈ ಮಂತ್ರಕ್ಕೆ ಶ್ರೀಸಾಯಣರು ಹೀಗೆ ವ್ಯಾಖ್ಯಾನಮಾಡಿದ್ದಾರೆ—

**विद्याभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमागत्यैवं प्रार्थयामास—हे ब्राह्मण, मामनधिकारिणेऽनुपदिश्य पालय। तवाहं निधिवत्पुरुषार्थहेतुरस्मि। तादृश्यां मयि, मदुपदेष्टरि त्वयि च योऽसूयां करोति, यश्चार्जवेन विद्यां नाभ्यस्यति, योऽपि स्नानाचमनाद्याचारनियतो न भवति, तादृशेभ्यः शिष्याभासेभ्यो मा न ब्रूयाः। तथा सति त्वध्दृदये स्थित्वा फलप्रदा भवेयम्॥**

**शेवधिः + त = शेवधिष्ट** ಈ ಸಂಧಿಕಾರ್ಯವು ವೇದದಲ್ಲಿ ಮಾತ್ರ ಕಂಡುಬರುತ್ತದೆ. ಪಾದಮಧ್ಯಸ್ಥವಾದ **स** ಕಾರಕ್ಕೆ **त** ಕಾರಾದಿಯಾದ **त्वाम् त्वम् ते तव तद्** ಮತ್ತು **ततक्षु** ಇವುಗಳು ಪರವಾದರೆ ಆ **स** ಕಾರವು **ष** ಕಾರವಾಗುವುದು. ಅನಂತರ **ष्टुत्व** ಸಂಧಿನಿಯಮಪ್ರಕಾರ ಮುಂದಿನ **त** ಕಾರವು **ट** ಕಾರವಾಗುವುದು

**ब्रूयाः**—√**ब्रू** II उ, ವಿಧಿಲಿಙ್ ಮಧ್ಯಮಪುರುಷ ಏಕವಚನ.

4 ಶ್ರೀಸಾಯಣಭಾಷ್ಯದ ಸಾರಾಂಶ—पूर्वस्मिन् मन्त्रे आचार्यस्य नियममभिधायास्मिन् मन्त्रे शिष्यस्य नियमोऽभिधीयते। वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यं; तद्विपरीतं सत्यं वेदवाक्यमवितथम्। तादृशेन य आचार्यः शिष्यस्य कर्णावातृणत्ति सर्वतस्तर्दनं पूरणं करोति। सर्वदा वेदं यः श्रावयतीत्यर्थः। किं कुर्वन्। अदुःखं कुर्वन्। मन्दप्रज्ञस्य माणवकस्य, आदावर्धर्चमृचं वा ग्रहीतुमशक्तस्य, यथा दुःखं न भवति तथा पादं पादैकदेशं वा ग्राहयन्। किं च अमृतं सम्प्रयच्छन्। अमृतत्वस्य देवत्वजन्मनो मोक्षस्य वा प्रापकत्वादमृतं वेदार्थः। तस्य प्रदानं कुर्वन्। तं तादृशमाचार्यं सन् शिष्यो मुख्यमातापितृरूपं मन्येत। पूर्वसिद्धौ तु मातापितरौ अधमस्य मनुष्यशरीरस्य प्रदानादमुख्यौ। तस्मै मुख्यमातापितृरूपायाचार्यायैकमपि द्रोहं न कुर्यात्॥

कतमच्चनाह—कतमत् + चन + ह (न द्रुह्येत्) ಯಾವದ್ರೋಹವನ್ನೂ ಬಗೆಯಬಾರದು.

5 ಸಾಯಣಭಾಷ್ಯಸಂಗ್ರಹ—ये त्वधमा विप्राः गुरुणाध्यापितास्सन्तो विनयोक्त्या तदीयहितचिन्तनेन शुश्रूषया वा गुरुं नाद्रियन्ते, आदररहितास्ते शिष्याभासा गुरोर्न भोजनीयाः। अनुभवयोग्या न भवन्ति। न हि तेषु गुरुः कृपां करोति। यथैव गुरुणा ते न पालनीयास्तथैव तान् शिष्याभासान् तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति। फलप्रदं न भवतीत्यर्थः॥

6 ಭಾಷ್ಯ—हे आचार्य, यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः। किं च यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत्। तस्मै तु मुख्यशिष्याय त्वदीयनिधिपालकाय भो ब्रह्मन् वेदरूपां मां विद्यां ब्रूयाः॥

7 ಧನ್ವಂತರಿ, ಕ್ಷಪಣಕ, ಅಮರಸಿಂಹ, ಶಂಕು, ವೇತಾಲಭಟ್ಟ, ಘಟಕರ್ಪರ, ಕಾಳಿದಾಸ, ವರಾಹಮಿಹಿರ, ವರರುಚಿ—ಇವರೇ ವಿಕ್ರಮನ ಒಡ್ಡೋಲಗದ ನವಮಣಿಗಳೆಂದು ಪ್ರತೀತಿ.

8 **प्रथितयशसां भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः ?**
—ಮಾಲವಿಕಾಗ್ನಿಮಿತ್ರದ ಪ್ರಸ್ತಾವನೆಯನ್ನು ನೋಡಿ.

9 **निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।**
**प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥**
—ಬಾಣಭಟ್ಟಕೃತ ಹರ್ಷಚರಿತ್ರೆಯ ಪೀಠಿಕಾಶ್ಲೋಕಗಳಲ್ಲೊಂದು.

10 ಕ್ರಿ.ಶ. ಹತ್ತನೇ ಶತಮಾನದಲ್ಲಿದ್ದ ರಾಜಶೇಖರಕವಿಯು ಮೂವರು ಕಾಳಿದಾಸರನ್ನು ಬಲ್ಲವನಾಗಿದ್ದನು—

**एकोऽपि जीयते हन्त कालिदासो न केनचित् ।**
**शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥**

11 ಸರ್ ವಿಲಿಯಂ ಜೋನ್ಸ್, ಗಯಟೆ, ಅಲೆಗ್ಸಾಂಡರ್ ಫಾನ್ ಹಂಬೋಲ್ಟ್, ಲಾಸ್ಸೆನ್ ಮೊದಲಾದ ಪಾಶ್ಚಾತ್ಯಪಂಡಿತರು.

12 **उपमा कालिदासस्य भारवेरर्थगौरवम् ।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥**
—ಈ ಶ್ಲೋಕವು ಮಾಘಕವಿಯ ಪರವಾದ ಸ್ತೋತ್ರವೇ ವಿನಾ ಕಾಳಿದಾಸಪರವಲ್ಲವೆಂಬುದು ಸ್ಪಷ್ಟ. ಪಾಮರರನ್ನು ದೂರಮಾಡಿ ಪಂಡಿತರಂಜನೆಯೇ ಕಾವ್ಯದ ಪರಮೋದ್ದೇಶವೆಂದೇರ್ಪಟ್ಟಾಗ ಈ ತಾರತಮ್ಯಭಾವವು ಉತ್ಪ್ರೇಕ್ಷಿಸಲ್ಪಟ್ಟಿದೆಯೆಂದು ಭಾವಿಸಬಹುದು.

13 ಪೃಥಿವೀ, ಜಲ, ಅಗ್ನಿ, ಪವನ, ಆಕಾಶ, ಸೂರ್ಯ, ಚಂದ್ರ ಮತ್ತು ಯಜಮಾನ—ಇವು ಈಶ್ವರನ ಎಂಟು ಶರೀರಗಳು.

14 **स्म** ಎಂಬ ನಿಪಾತದ ಯೋಗವಿರುವ ವರ್ತಮಾನರೂಪಗಳಿಗೆ ಭೂತಾರ್ಥ ಬರುವುದು ; ವಿರಾಜಿಸುತ್ತಿದ್ದನು.

15 'अधि शीङ्स्थासां कर्म' (ಸಿ.ಕೌ. 543)--ಅಧಿ ಎಂಬುಪಸರ್ಗ ಸಹಿತವಾದ शी, स्था ಮತ್ತು आस् ಧಾತುಗಳ ಕ್ರಿಯೆಗಳು ಎಲ್ಲಿ ನಡೆಯುವುವೋ ಆ ಸ್ಥಳವಾಚಿಯಾದ ಪದವು ದ್ವಿತೀಯಾವಿಭಕ್ತಿಯಲ್ಲಿರ ಬೇಕು. ಉದಾ--अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः ।

16 सुराजा—ಪೂಜನಾರ್ಥಕವಾದ सु, अति ಇವುಗಳೊಡನೆ ಸಮಸ್ತವಾದ ಪದಗಳಿಗೆ ಸಮಾಸಾನ್ತವಿಧಿಯು ಅನ್ವಯಿಸುವುದಿಲ್ಲ ('न पूजनात्' ಸಿ. ಕೌ. 954). न ಕಾರಾಂತವಾದ राजन् ಶಬ್ದವು ಸಮಾಸದ ಕೊನೆಯಲ್ಲಿ अ ಕಾರಾಂತವಾಗುತ್ತದೆ ('राजाहस्सखिभ्यष्टच्' ಸಿ. ಕೌ. 788) ಎಂಬುದು ಸಮಾಸಾಂತವಿಧಿ.

17 आनर्ज—√अर्ज् I प; ಲಿಟ್ ಪ್ರಥಮಪುರುಷೈಕವಚನರೂಪ.

18 मालविका चाग्निमित्रश्च मालविकाग्निमित्रौ; तावधिकृत्य कृतं (नाटकं) मालविकाग्निमित्रम्; मालविकाग्निमित्रमिति नाम यस्य तत्; तस्मिन् ।

19 अन्तपालः—ರಾಜ್ಯದ ಗಡಿಯನ್ನು ರಕ್ಷಿಸುವವನು

20 ಹೊಸದಾಗಿ (ಮೊನ್ನೆತಾನೆ) ಆರಂಭಿಸಿದ ಉಪದೇಶವುಳ್ಳ

21 चलितम्—ಒಂದು ನೃತ್ಯವಿಶೇಷ —

'तदेच्चलितं नाम साक्षाद्यदभिनीयते ।
व्यपदिश्य पुरावृत्तं स्वाभिप्रायप्रकाशकम् ॥'

ಹಿಂದೆ ನಡೆದ ಸಂದರ್ಭವನ್ನು ನೆಪಮಾಡಿಕೊಂಡು ಸ್ವಂತ ಅಭಿಪ್ರಾಯ ವನ್ನು ಸೂಚಿಸುವ ನಾಟ್ಯವಿಶೇಷವನ್ನು 'ಚಲಿತ' ವೆಂದು ಕರೆಯು ತ್ತಾರೆ.

22 अन्तरा, अन्तरेण ಈ ಅವ್ಯಯಗಳ ಯೋಗವಿದ್ದಲ್ಲಿ ದ್ವಿತೀಯಾ ವಿಭಕ್ತಿಯು ವಿಹಿತವಾಗಿದೆ.

23 ನಾಟ್ಯಶಿಕ್ಷೆಯೇ ಮುಂತಾದ ಕೆಲಸಗಳಲ್ಲಿ ನಿರತಳಾಗಿದ್ದ ಪ್ರಯುಕ್ತ ರಾಜನ ಹತ್ತಿರ ಬರಲು ಯಾವಾಗಲೂ ಅವಕಾಶವಿರಲಿಲ್ಲ. ಹೀಗಿದ್ದರೂ ರಾಜನ ಕಣ್ಣಿಗೆ ಬಿದ್ದದು ಹೇಗೆ—ಎಂದು ಪ್ರಶ್ನೆ.

24 ಪ್ರತ್ಯುತ್ಥಾನ ಮತ್ತು ಕುಶಲಪ್ರಶ್ನೆಗಳಾದ ನಂತರ

25 **कान्तं**—ಮನೋಹರವಾದ; **त्रैगुण्योद्भवं**—**त्रयो गुणास्त्रिगुणाः : त्रिगुणा एव त्रैगुण्यम्** । ಸತ್ವ, ರಜಸ್, ತಮಸ್ ಎಂಬ ಮೂರು ಗುಣಗಳಿಂದುಂಟಾದ. **नानारसं** – ಶೃಂಗಾರಾದಿ ನವರಸಭರಿತ ವಾದ

26 ಉಪದೇಶಕನ

27 ಅಪ್ಪಣೆಪಡೆದು, ಬೀಳ್ಕೊಟ್ಟು

28 **लेखो हस्ते यस्य सः : तेन**

29 **अनुवाचित**—ತನ್ನಷ್ಟಕ್ಕೆ ತಾನೇ ಓದಿಕೊಂಡ

30 **अनु + √युज्** VII **उ.** ಲಿಟ್ ಪ್ರಥಮಪುರುಷೈಕವಚನಂ—ಪ್ರಶ್ನೆ ಮಾಡಿದನು.

31 ಪೂಜ್ಯನಾದ ನಿನ್ನಿಂದ (ಅಗ್ನಿಮಿತ್ರನಿಂದ)

32 ಒಂದೇ ವಂಶದಲ್ಲಿ ಹುಟ್ಟಿದ ದಾಯಾದರ ವಿ ಯದಲ್ಲಿ

33 ಪ್ರೇರಣಾರ್ಥಕಪ್ರಯೋಗ (**णिजन्त**)—ಬಿಡಿಸಲ್ಪಡುವ. ಮಾಧವಸೇನ ನನ್ನು ಬಂಧನದಿಂದ ನಾನು (ವಿದರ್ಭರಾಜನಾದ ಯಜ್ಞಸೇನನು) ಬಿಡುವಂತೆ ನೀನು (ಅಗ್ನಿಮಿತ್ರನು) ಪ್ರೇರಿಸಬೇಕಾದರೆ, ಒಂದು ಕರಾರಿ ಗೊಳಪಟ್ಟರೆ ಆಗಬಹುದು.

34 **√मुच्** VI **उ.** ಲುಟ್ ಪ್ರಥಮಪುರುಷೈಕವಚನವು.

35 ತನ್ನ ಸ್ಥಿತಿ, ದರ್ಜೆ ಮುಂತಾದುವುಗಳನ್ನು ತಿಳಿಯದಿದ್ದವನು, ಮೂಢ

36 ಶತ್ರುಪಕ್ಷದಲ್ಲಿ

37 ಪ್ರಣಯವ್ಯವಹಾರದಲ್ಲಿ ಮಂತ್ರಿಯಾದ

38 ನಮ್ಮ ಇಷ್ಟಾರ್ಥಸಿದ್ಧಿಯಾಗುವ—ಅಂದರೆ ಮಾಲವಿಕೆಯನ್ನು ನೋಡ ಬೇಕೆಂಬ ಇಷ್ಟವನ್ನು ಪೂರೈಸುವ—ಉಪಾಯವನ್ನು ಹುಡುಕುವುದ ರಲ್ಲಿ ನಿನ್ನ ಜ್ಞಾನಚಕ್ಷುವು ನಿರತವಾಗಿದೆಯೇ? ಏನಾದರೂ ಉಪಾಯ ವನ್ನು ಕಂಡುಹಿಡಿದೆಯಾ? ಎಂದರ್ಥ.

39 **सप्रतिबन्धमर्थं अधिगन्तुं सहायवानेव प्रभुः :**
**सचक्षुरपि तमसि दीपेन विना दृश्यं न पश्यति ।**

ಅಡಚಣೆಗಳಿಂದ ದುಸ್ಸಾಧ್ಯವಾದ ವಿಷಯವನ್ನು ಸಾಧಿಸಲು, ಸಹಾಯ ಸಂಪತ್ತುಳ್ಳವನು ಮಾತ್ರ ಶಕ್ತನಾಗುತ್ತಾನೆ. ಕಣ್ಣುಗಳಿದ್ದರೂ ಕೂಡ

ಕತ್ತಲೆಯಲ್ಲಿ ನೋಡಬೇಕಾದರೆ ದೀಪ ಬೇಕೇಬೇಕು. ಈ ಕಷ್ಟತರವಾದ ಪ್ರಸಂಗದಲ್ಲಿ ನಿನ್ನ ಸಹಾಯವು ಅತ್ಯವಶ್ಯಕವು.

**40** ಕೀಳು ಮೇಲು ಎಂಬ ವಿವೇಚನೆಯು

**41** ಪಂಚಮ್ಯೇಕವಚನ—ಎದುರುಪಕ್ಷದವನದೆಸೆಯಿಂದ

**42** **जयत्वार्यपुत्रः, विजयतां देवः**—ಇತ್ಯಾದಿ ಅಭಿವೃದ್ಧಿಸೂಚಕವಾದ ಆಶಂಸನೆಗಳನ್ನು ಮಾಡಿ

**43** 15ನೇ ಟಿಪ್ಪಣಿಯನ್ನು ನೋಡಿ.

**44** ಹಾಸ್ಯಮಾಡುವುದು (ಹಿಯ್ಯಾಳಿಸುವುದು) ಸಾಕು. ಪಟ್ಟಣವಾಸದಲ್ಲಿರುವವರು ರತ್ನಪರೀಕ್ಷೆಮಾಡಿಸುವುದಕ್ಕೆ ಹಳ್ಳಿಗೆ ಹೋಗುತ್ತಾರೆಯೇ? ತಿಳಿದಂಥಾ ನೀವುಗಳಿರುವಾಗ ಅಜ್ಞಳಾದ ನಾನು ವಿಮರ್ಶಕಳಾಗುವುದೆಂದರೇನು?

**45** ರಾಜನು ಇರಾವತಿಗೆ ಪಾಠಹೇಳುವ ಹರದತ್ತಾಚಾರ್ಯನಿಗೆ ಆಶ್ರಯಕೊಟ್ಟಿದ್ದಾನೆ. ರಾಣಿಯು ಮಾಳವಿಕೆಯ ಉಪಾಧ್ಯಾಯನಾದ ಗಣದಾಸಾಚಾರ್ಯನಿಗೆ ಆಶ್ರಯಕೊಟ್ಟಿದ್ದಾಳೆ. ಆದುದರಿಂದ ರಾಜನೂ ರಾಣಿಯೂ ನಿಷ್ಪಕ್ಷಪಾತವಾಗಿರಲಾರರು.

**46** ಟಗರಿನ ಕಾಳಗವನ್ನು

**47** ಆಚಾರ್ಯರಿಬ್ಬರ

**48** ನಂಬಿಕೆಯುಂಟಾಗುವಂತೆ ಮಾಡಲ್ಪಡಬೇಕು; ಮತ್ತಾವವಿಷಯದಲ್ಲಿ ಪರೀಕ್ಷೆಕೊಡಬೇಕು? **प्रति** + √इ II **प.** ಈ ಧಾತುವಿನಿಂದುತ್ಪನ್ನವಾದ, ಪ್ರೇರಣಾರ್ಥವುಳ್ಳ, **तव्य** ಪ್ರತ್ಯಯಾಂತರೂಪ.

**49** ಕೆಲವರು ತಾವೇ ಕೆಲಸಮಾಡುವಾಗ ಶ್ಲಾಘ್ಯವಾಗಿ ಮಾಡುತ್ತಾರೆ; ಕೆಲವರು ಇತರರಿಗೆ ಬೋಧಿಸುವುದರಲ್ಲಿ ನಿಪುಣರಾಗಿರುತ್ತಾರೆ. ಯಾರು ಸ್ವಂತವಾದ ಜ್ಞಾನದಲ್ಲಿಯೂ, ಇತರರಿಗೆ ಬೋಧಿಸುವುದರಲ್ಲಿಯೂ ಅಂದರೆ ಅಧ್ಯಯನ, ಅಧ್ಯಾಪನ ಇವೆರಡು ವಿಷಯಗಳಲ್ಲಿಯೂ ಏಕಪ್ರಕಾರವಾಗಿ ಶಕ್ತರಾಗಿರುತ್ತಾರೆಯೋ ಅವರನ್ನು ಉಪಾಧ್ಯಾಯರಲ್ಲಿ ಶ್ರೇಷ್ಠರೆಂದೆಣಿಸಬೇಕು.

**50** ಸಾರಾಂಶ

**51** ನಾಟ್ಯಾಚಾರ್ಯರಿಬ್ಬರ ಜಗಳದಲ್ಲಿ ಲಾಭಹೊಂದುವವನು ರಾಜನೆಂದು ಧಾರಿಣೀದೇವಿಯು ಬಲ್ಲಳು. ಆದುದರಿಂದ ಸಾಧ್ಯವಾದಮಟ್ಟಿಗೆ ಅವರಿಬ್ಬರ

ಸ್ಪರ್ಧೆಯನ್ನು ಮುಂದುವರಿಸುವುದಕ್ಕೇ ಇಷ್ಟಪಡುವುದಿಲ್ಲ. ರಾಜನೂ ಕೂಡ ಈ ಜಗಳದಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿ ಆಸಕ್ತಿಯನ್ನು ತೋರಿಸಲಾರ. ಆದುದರಿಂದ ವಿದೂಷಕನೂ ಪಂಡಿತಕೌಶಿಕಿಯೂ ತೋರಿಸುವ ಚಾತುರ್ಯವು ಗಮನಾರ್ಹವಾಗಿದೆ.

52 ಒಲಿಸುತ್ತಿರಲಾಗಿ

53 ಯಾರಿಗೂ ಹೆದರದ

54 ಒಂದೇ ವಿಷಯವನ್ನವಲಂಬಿಸುವ

55 ವಿಜಯವನ್ನು ದ್ವೇಷಿಸತಕ್ಕವಳು

56 ಹೆಂಗಸರಿಗೆ ಎಡಪಾರ್ಶ್ವದ ಅಂಗಗಳು ಅದುರಿದರೆ ಒಳ್ಳೆಯ ಶಕುನವೆಂದು ಹೇಳುತ್ತಾರೆ.

57 ಕಾಮಪರವಶನಾಗಿದ್ದ ರಾಜನು

58 ವಿದ್ವಾಂಸನು. 'ವಿದ್ವಾನ್ ವಿಪಶ್ಚಿದ್ದೋಷಜ್ಞಃ' (ಅಮರ)

59 √**हस् I प. णिजन्त**, ಲಙ್ ಪ್ರಥಮಪುರುಷೈಕವಚನಮ್'.

60 ದೇವರು, ರಾಜ ಮತ್ತು ಗುರು ಇವರನ್ನು ನೋಡಲು ಹೋಗುವಾಗ ಬರಿಯ ಕೈಯಲ್ಲಿ ಹೋಗಬಾರದೆಂಬುದು ಸಂಪ್ರದಾಯ.

61 ವಿದೂಷಕನ ಚಾಪಲ್ಯದಿಂದ — ಅಂದರೆ ರಾಣಿಯು ಉಯ್ಯಾಲೆಯನ್ನು ತೂಗಿಕೊಳ್ಳುತ್ತಿದ್ದಾಗ ವಿದೂಷಕನು ವಿನೋದದಲ್ಲಿ ಮಾಡಿದ ಚೇಷ್ಟೆಯ ಪರಿಣಾಮವಾಗಿ ಉಯ್ಯಾಲೆಯಿಂದ ಬಿದ್ದು ಕಾಲು ಉಳುಕಿತ್ತೆಂದು ಊಹಿಸಬಹುದು.

62 ರೋಗಯುಕ್ತವಾಗಿದೆ, ಉಳುಕಿದೆ, ನೋವಾಗಿದೆ. **रुक्-रुजौ-रुजः**

63 ಎರಡು ವಿಧವಾದ ಅಶೋಕವೃಕ್ಷವು ಕಂಡುಬರುತ್ತವೆ--ತಪನೀಯಾಶೋಕ ಮತ್ತು ರಕ್ತಾಶೋಕ ಎಂಬುದಾಗಿ. ಮೊದಲನೆಯುದರ ಬಣ್ಣ ಸುವರ್ಣದ ಬಣ್ಣ, ಎರಡನೆಯದರದು ಕೆಂಪುಬಣ್ಣ.

ವೃಕ್ಷಗಳು ಮತ್ತು ಲತೆಗಳು ಹೂ ಬಿಡದಿದ್ದಾಗ ಮಾಡುವ ಪ್ರತಿವಿಧಾನಕ್ಕೆ ದೋಹದವೆಂದು ಹೆಸರು. ಒಂದೊಂದು ಜಾತಿಯ ವೃಕ್ಷಕ್ಕೆ ಒಂದೊಂದು ವಿಧವಾದ ದೋಹದಕ್ರಮವು ಹೇಳಲ್ಪಟ್ಟಿದೆ—ಅಲಂಕೃತಳಾದ ಸ್ತ್ರೀಯು ಪ್ರಿಯಂಗುಲತೆಯನ್ನು ಮುಟ್ಟಿದರೆ ಸಾಕು; ಅಶೋಕವೃಕ್ಷಕ್ಕೆ ಪಾದಪ್ರಹಾರವಾದರೆ ಸಂತೋಷ; ಮಂದಾರವೃಕ್ಷಕ್ಕೆ ಪ್ರಣಯದ ಮಾತುಗಳು; ಸಂಪಿಗೆಗೆ ಮುಗುಳ್ನಗೆ; ಮಾವಿನಮರಕ್ಕೆ ಬಾಯು

ಸಿರು ; ನಮೇರುವಿಗೆ ಸಂಗೀತ ; ಕರ್ಣಿಕಾರದ ಮುಂದೆ ನರ್ತನ ಇತ್ಯಾದಿ. ಯದ್ಯಪಿ ಈ ದೋಹದವಿಧಾನದಲ್ಲಿ ಆಪಾತತಃ ನಂಬಿಕೆ ಯುಂಟಾಗಲಾರದಾದರೂ ಈ ವಿಜ್ಞಾನಯುಗದಲ್ಲಿ ಮೇಲ್ಕಂಡ ಚಿಕಿತ್ಸಾ ಕ್ರಮವು ಸಪ್ರಮಾಣವೆಂದು ರುಜುವಾತಾದರೆ ಆಶ್ಚರ್ಯವಲ್ಲ.

**64** ಕಾಲಿಗೆ ಬಣ್ಣ ಬಳಿದುಕೊಳ್ಳುವುದು ಪೂರ್ವಪದ್ಧತಿಯ ಪ್ರಕಾರ ಒಂದು ಅಲಂಕಾರ.

**65** ಬಡಪ್ರಾಣಿಗಳಿಬ್ಬರ. ತಮ್ಮ ಸಂಭಾಷಣೆಯು ಅಷ್ಟು ಅಕೃತ್ರಿಮವಾಗಿದ್ದರೂ ಫಲಿತಾಂಶವು ವಿರಸವೆಂದು ಪಾಪ, ಆ ಹುಡುಗಿಯರಿಗೇನು ಗೊತ್ತು ? ಎಂದು ಭಾವ. **विस्रब्धालापः**–ಸ್ವಚ್ಛಂದವಾದ ರಹಸ್ಯ ಸಂಭಾಷಣೆ

**66** ಆಗದ ಹೋಗದ ಮಾತನ್ನು ಹೇಳುತ್ತಿದ್ದೀಯೆ. ‘ **भर्तुरङ्कपरिवर्तिनी भव** ’ ಎಂಬ ಮಾತಿಗೆ ಉತ್ತರ. ಪರಿಚಾರಿಕೆಯಾಗಿದ್ದ ಮಾಳವಿಕೆ ರಾಜನ ಪ್ರಣಯಕ್ಕೆ ಹೇಗೆ ಅರ್ಹಳೆಂದು ಶಂಕೆ.

**67** ನಾನು ನಿನಗೆ ಪ್ರಿಯಳಾದುದರಿಂದ ಇಂಥಾ ಒಳ್ಳೆಯದು ನನಗಾಗಲಿ ಎಂದು ಬಯಸುತ್ತೀಯೆ. ವಸ್ತುತಃ ಅದು ಸಾಧ್ಯವಲ್ಲವೇ ಅಲ್ಲ–ಎಂದಭಿಪ್ರಾಯ.

**68** ನಿನ್ನ ಮನಸ್ಸಿಗೆ (ಬಾಯಿಗೆ) ಬಂದದ್ದು ಹೇಳುವಿಯೋ ?

**69** ರಾಣಿ, ಇರಾವತಿ ಇವರುಗಳ ಹೆದರಿಕೆಯಿದ್ದ ಮಾತ್ರಕ್ಕೆ ಅತ್ಯಂತ ಪ್ರಿಯನಾದ ರಾಜನನ್ನು ಹೊಂದುವುದು ಬೇಡವೇ ? ಎಂದು ಧ್ವನಿ.

**70** ಕಷ್ಟಕಾಲದಲ್ಲಿ

**71** ಬಕುಳದ ಹೂಮಾಲೆಯು ಎಷ್ಟು ಉಪಯೋಗಿಸಿದರಷ್ಟು ಹೆಚ್ಚು ಸುವಾಸನೆಯನ್ನು ಬೀರುತ್ತದೆ. ಅದೇ ರೀತಿ ಈ ಸಖಿಯೂ ಕೂಡ ಎಷ್ಟು ಕಷ್ಟ ಬಂದರೆ ಅಷ್ಟು ಹೆಚ್ಚಾಗಿ ಸಹಾಯಕಳಾಗುತ್ತಾಳೆ.

**72** ವಿಷಯವನ್ನು ತಿಳಿದಂಥ

**73** ಅವಕಾಶವನ್ನು ಹೊಂದಿದ. ‘ ಒಂದು ಪ್ರಾರ್ಥನೆಯಿತ್ತು. ಅದಕ್ಕೆ ಈಗ ಅವಕಾಶ ಸಿಕ್ಕಿತು. ದಯವಿಟ್ಟು ಲಾಲಿಸು ’ ಎಂದರ್ಥ.

**74** ಮಾಲವಿಕೆ ಬಕುಳಾವಳಿಕೆ ಇವರ

**75** ಕದಿಯುವಾಗಲೇ ಸಿಕ್ಕಿಬಿದ್ದ ಕಳ್ಳನಂತೆ

**76** ನಿರ್ಭಾಗ್ಯಳಾದ ನಾನು ಇಲ್ಲಿಗೆ ಬಂದು ಆರ್ಯಪುತ್ರನ ವಿಲಾಸವನ್ನು ಅಡ್ಡಿ ಮಾಡುತ್ತಿರಲಿಲ್ಲವೆಂದು ತಾತ್ಪರ್ಯ.

77 ಸಾಮಾನ್ಯವಾಗಿ ಗ್ರಹಗಳ ವೀಕ್ಷಣವಿದ್ದರೆ ನಮಗೆ ಒಳ್ಳೆಯದು ; ಇಲ್ಲದಿದ್ದರೆ ಹಾನಿಕರ. ಆದರೆ ಅಂಗಾರಕನು ಮಾತ್ರ ವಿಪರೀತಲಕ್ಷಣವುಳ್ಳವನು.

78 **दाक्षिण्यम्**— ಸಮತಾಬುದ್ಧಿ ; ನಿಷ್ಪಕ್ಷಪಾತಿತ್ವ. **अदाक्षिण्यम्**— ಪಕ್ಷಪಾತ

79 ಕೆಂಪುಕಣ್ಣಿನವಳು. ಕೋಪವನ್ನು ಸೂಚಿಸುವ ವಿಶೇಷಣ.

80 ಸೂರ್ಯನ ಕಿರಣಗಳು ಕೂಡ ಪ್ರವೇಶಿಸಲಾಗದ (ನೆಲಮಾಳಿಗೆಯ ವಾಸವನ್ನನುಭವಿಸುತ್ತಿದ್ದಾರೆ).

81 **उप+नि√अस् IVप**— ಲುಙ್ ಪ್ರಥಮಪುರುಷೈಕವಚನವು.

82 ಮೃತ್ಯುರೂಪದಲ್ಲಿದ್ದ ಹಾವಿನಿಂದ

83 ಹಲ್ಲು ಊರಿದ ಗುರುತುಗಳು

84 ನಟನೆಯಾದರೂ ಈ ಮಾತು ಎಷ್ಟು ಸಹಜವಾಗಿದೆ !

85 ಅನುಕರಣಧಾತುಪ್ರಯೋಗ— ಚುಮುಚುಮುಗುಟ್ಟುತ್ತದೆ.

86 ಇಲ್ಲಿ ಎರಡರ್ಥವು ಧ್ವನಿತವಾಗುತ್ತದೆ. ವಿದೂಷಕನಿಗೆ ·ವಿಷಪರಿಹಾರವಾಗುವುದೊಂದು ಸಿದ್ಧಿ. ಮಾಲವಿಕಾಬಂಧಮೋಕ್ಷವು ಮತ್ತೊಂದು ರಹಸ್ಯವಾದ ಕರ್ಮಸಿದ್ಧಿ.

87 **मतिश्च कर्म च मतिकर्मणी, कुशले मतिकर्मणी यस्य सः कुशलमतिकर्मा, तम् ।**

88 ಚಿಗುರನ್ನು ಕಡಿಯುತ್ತಿದ್ದ, ತಿನ್ನುತ್ತಿದ್ದ

89 ಮೃತ್ಯುವಿನಿಂದ ಪಾರಾದ

90 ಪ್ರಬಲವಾದ ಗಾಳಿಗೆ ಸಿಕ್ಕಿದ ಚಿಗುರೆಲೆಯಂತೆ

91 ಅನರ್ಥಗಳು ಹೇಗೆ ಒಂದರಮೇಲೊಂದು ಒದಗುವುವೋ ಹಾಗೆಯೇ ಒಳ್ಳೆಯದೂ ಕೂಡ, ಅದೃಷ್ಟ ಚೆನ್ನಾಗಿದ್ದರೆ, ಒಂದರಮೇಲೊಂದು ಪ್ರಾಪ್ತವಾಗುವುದು ಎಂದು ತೋರುತ್ತದೆ. ಏಕೆಂದರೆ ಅಗ್ನಿಮಿತ್ರರಾಜನ ಅರಮನೆಯಲ್ಲಿ ಮುಂದೆ ವಿವರಿಸುವಂತೆ ಅಭ್ಯುದಯವೃತ್ತಾಂತಗಳನೇಕ ಸಂಭವಿಸಿದುವು.

92 ತನ್ನ ಇಷ್ಟಕ್ಕೆ ಅನುಕೂಲವಾದ ವರ್ತನೆಯುಳ್ಳ. ಷಷ್ಠ್ಯೇಕವಚನವು. ಪತಿಯ ಇಷ್ಟಾನುವರ್ತಿಯಾಗಿರುವುದು ಸತಿಯ ಧರ್ಮವೆಂದು ಭಾವಿಸಿ ಹಿಂದೆ ಎಷ್ಟೋ ಸಾರಿ ಧಾರಿಣೀದೇವಿಯು ರಾಜನ ವಿಷಯದಲ್ಲಿ ತೋರಿಸಿದ ಕ್ಷಮೆಯನ್ನು ಜ್ಞಾಪಿಸಿಕೊಂಡರೆ, ಈಗಲೂ ರಾಜನ ಅಭೀಷ್ಟಸಿದ್ಧಿಗಾಗಿಯೇ ಮಾಲವಿಕೆಯು ವಿಶೇಷಾಲಂಕೃತಳಾಗಿರುವುದೆಂಬುದನ್ನು ನಂಬಬಹುದು— ಎಂದಭಿಪ್ರಾಯ.

93 ಆಸಕ್ತಿ

94 ಶಿಕ್ಷಿತರು, ಪರಿಶ್ರಮವುಳ್ಳವರು

95 ಅರೀತಿಯಾಗಿ ದೂರನಾದ ಸಹೋದರನುಳ್ಳ ಮಾಳವಿಕೆಯನ್ನು

96 **पर्याप्तुमिच्छुः परीप्सुः** ರಕ್ಷಿಸಲಿಚ್ಛೆಯುಳ್ಳವನಾಗಿ

97 ಸ್ವಾಮಿಪ್ರಿಯನಾದ ಸುಮತಿಯು ಪ್ರಿಯವಾದ ತನ್ನ ಪ್ರಾಣಗಳನ್ನು ಬಲಿಯಾಗಿ ಕೊಡುವುದರ ಮೂಲಕ ದಣಿಯ ಋಣವನ್ನು ಪರಿಹರಿಸಿದನು.

98 ಪುನಃ ಸ್ಮರಣೆಗೆ ತರಲ್ಪಟ್ಟ ವೈಧವ್ಯದುಃಖವುಳ್ಳವಳಾಗಿ. ಕೌಶಿಕಿಯು ಮೊದಲೇ ವಿಧವೆಯಾಗಿದ್ದು ವ್ಯಸನಕ್ಕೀಡಾಗಿದ್ದಳು. ಈಗ ಅಣ್ಣನಾದ ಸುಮತಿಯು ಸತ್ತಾಗ ಕೇವಲ ಅನಾಥಳಾಗಿ ಕಟುತರವಾದ ದುಃಖಕ್ಕೆ ಪಾತ್ರಳಾದಳು.

99 ಅನುಚಿತವಾದುದನ್ನು

100 ರಹಸ್ಯವು

101 ಒಲಿದ ಅಥವಾ ಪ್ರಸನ್ನವಾದ ಮನಸ್ಸುಳ್ಳ

102 **√शास्** II **प.** ಲೋಟ್ ಪ್ರಥಮಪುರುಷದ್ವಿವಚನಮ್.

103 ಹಗಲು ರಾತ್ರಿಗಳೆಂದು ವಿಭಾಗಮಾಡಿಕೊಂಡು ಸೂರ್ಯಚಂದ್ರರು ಹೇಗೆ ಲೋಕರಕ್ಷಕರಾಗಿದ್ದಾರೆಯೋ ಹಾಗೆ ವರದಾನದಿಯ ಉತ್ತರದಕ್ಷಿಣ ದೇಶಗಳೆಂದು ಭಾಗಮಾಡಿಕೊಂಡು ರಾಜ್ಯವನ್ನು ಇಬ್ಬರೂ ಆಳಲಿ.

104 ಅಭಿಪ್ರಾಯ, ಅಭಿಮತ

105 ಖಿಲ್ಲತ್ತುಗಳಿಂದೊಡಗೂಡಿದ

106 ಇಕ್ಷ್ವಾಕುಕುಲೋತ್ಪನ್ನನಾದ ಸಗರಚಕ್ರವರ್ತಿಯು ಯಜ್ಞಾಂಗವಾಗಿ ದಿಗ್ವಿಜಯಕ್ಕೆ ಕಳುಹಿಸಿದ ಕುದುರೆಯು ಅಪಹರಿಸಲ್ಪಟ್ಟಿತು. ಅದನ್ನು ಹುಡುಕಿ ತರುವ ಪ್ರಯತ್ನದಲ್ಲಿ ಅವನ 60,000 ಪುತ್ರರು ಕಪಿಲಋಷಿಯ ಶಾಪದಿಂದ ನಾಶಹೊಂದಿದರು. ಮೊಮ್ಮಗನಾದ ಅಂಶುಮಂತನು ಅಶ್ವವನ್ನು ಹುಡುಕಿ ವಾಪಸು ತಂದು ಯಜ್ಞವು ಸಾಂಗವಾಗಿ ನೆರವೇರುವಂತೆ ಮಾಡಿದನೆಂದು ಪೂರ್ವಕಥೆ.

**यक्ष्ये**—**√यज्** I **आ.** ಲೃಟ್ ಉತ್ತಮಪುರುಷೈಕವಚನಮ್.

107 ಕೋಪವನ್ನು ತ್ಯಜಿಸಿದ **विगतो रोषो यस्मात्तत् विगतरोषं. विगतरोषं चेतो यस्य सः विगतरोषचेताः, तेन**

108 ಯಜ್ಞಸೇನನ ಭಾವನಾದ ಮೌರ್ಯಮಂತ್ರಿಯನ್ನೂ ಸೇರಿಸಿಕೊಂಡು

# श्रीमहीशूरजनपदसम्पदभिवर्णनम्

109 ಶ್ರೀಹಯಗ್ರೀವರ ದಯೆಯು ಸರ್ವಪ್ರಕಾರದಲ್ಲಿಯೂ ನಮ್ಮ ಪ್ರಭುವರ್ಯರ ಮೇಲಿರಲೆಂದು ಮಂಗಳಾಶಂಸನ. ಅಮೃತಸಮಾನವಾದ, ಶೀತಲವಾದ, ಮೂರು ಲೋಕಗಳ ತಾಪವನ್ನು ಪರಿಹರಿಸುವ, ಆಪ್ಯಾಯನವಾದ, ಮನೋಹರವಾದ, ದಿಕ್ಕುದಿಕ್ಕುಗಳಲ್ಲಿಯೂ ಪ್ರಸರಿಸುವ, ಶ್ರೀಹಯಗ್ರೀವರ ದಿವ್ಯತೇಜಃಕಿರಣಾಂಕುರಗಳು ಗುಣನಿಧಿಯಾದ, ಕವಿಗಳಿಗೆ ಕಲ್ಪತರುಪ್ರಾಯನಾದ, ಶ್ರೀಕೃಷ್ಣಭೂಪಾಲನಿಗೆ ದೀರ್ಘಾಯುಸ್ಸನ್ನೂ ನೀತಿಕೌಶಲವನ್ನೂ ಅಪರಿಮಿತವಾದ ಐಶ್ವರ್ಯವನ್ನೂ ಕರುಣಿಸಲಿ.

110 **तृप्तिमभजन्**—ತೃಪ್ತಿಯನ್ನು ಹೊಂದದವನಾಗಿ

**सह्यसुता**—ಕಾವೇರೀನದಿ. ಸಹ್ಯಾದ್ರಿಯಲ್ಲಿ ಹುಟ್ಟಿದವಳು.

**उर्वरां**—ಸಮಸ್ತ ಸಸ್ಯಸಂಪತ್ತುಳ್ಳದ್ದನ್ನಾಗಿ '**उर्वरा सर्वसस्याढ्या**'

111 ಶ್ರೀಕೃಷ್ಣರಾಜಸಾಗರದ ಅಣೆಕಟ್ಟಿನ ಗೋಡೆಯಲ್ಲಿ ಪ್ರತಿಷ್ಠೆಮಾಡಿರುವ ಕಾವೇರೀಮಾತೆಯ ಪ್ರತಿಮೆಯು ಶ್ಲೋಕದ ಉತ್ತರಾರ್ಧದಲ್ಲಿ ಉಕ್ತವಾಗಿರುವುದು.

112 ಬೃಂದಾವನದ ಚಿತ್ರವಿಚಿತ್ರವಾದ ದೀಪೋತ್ಸವವು ಇಲ್ಲಿ ವರ್ಣಿತವಾಗಿದೆ. **निमग्न**—ಮುಳುಗಿದ. ನೀರಿನೊಳಗೆ ಬಣ್ಣಬಣ್ಣದ ವಿದ್ಯುದ್ದೀಪಗಳು ಉರಿಯುತ್ತಿರುತ್ತವೆಯೆಂಬುದನ್ನು ನೋಡಿದವರು ಬಲ್ಲರು. **वेशन्तैः**—ಸಣ್ಣಕೊಳಗಳಿಂದ. **निर्झरैः**—ವಾರಿಪ್ರವಾಹಗಳಿಂದ. **बाभाति**—**अतिशयेन भाति**—(**यङ्लुगन्तरूप**).

113 **स्यदः**—ವೇಗ '**रंहस्तरसी तु रयस्स्यदः**' **इत्यमरः. भूमतः**—ಬಾಹುಳ್ಯದಿಂದ. **विष्वक्**—ಸರ್ವತ್ರ, ಎಲ್ಲಾಕಡೆಯಲ್ಲಿಯೂ. ಶಿವನಸಮುದ್ರದಲ್ಲಿ ಸಂತತವಾಗಿ ನಡೆಯುವ ವಿದ್ಯುಚ್ಛಕ್ತ್ಯುತ್ಪಾದನವನ್ನು ಇಲ್ಲಿ ಹೇಳಿದೆ.

114 ಚಿನ್ನದಗಣಿಯ ಪ್ರಶಂಸೆ. ಭೂಮಿಗೆ ವಸುಧೆಯೆಂಬ (**वसु दधातीति**) ಹೆಸರು ಅನ್ವರ್ಥವೆಂದು ಭಾವ.

115 ವಿದ್ಯುಚ್ಛಕ್ತಿಯ ಉಪಯೋಗಗಳನ್ನು ಈ ಎರಡು ಶ್ಲೋಕಗಳಲ್ಲಿ ವರ್ಣಿಸಿದೆ. **वयनं**—ನೆಯ್ಯುವುದು ; **पेषणं**-(ಹಿಟ್ಟು) ಬೀಸುವುದು ; **अवहतिः**-ಕುಟ್ಟುವುದು ; **अश्मोत्क्षेपः**—ಕಲ್ಲುಗಳನ್ನು ಎತ್ತುವುದು, ಎಸೆಯುವುದು ; **शिखरिद्दलनं**—ಬೆಟ್ಟವನ್ನು ಸೀಳುವುದು, ಸುರಂಗ ಹೊಡೆಯುವುದು. **पाथसा वर्त्मसेकः**—ರಸ್ತೆಗಳಲ್ಲಿ ನೀರನ್ನು ಚುಮುಕಿಸುವುದು ; **तैलादानं** – ಎಣ್ಣೆತೆಗೆಯುವುದು ; **संस्कृतिर्भूषणानां**—ಆಭರಣಗಳಿಗೆ ಮಿರುಗುಹಾಕುವುದು.

116 ಹೊರಳಿರುವ ನರಗಳನ್ನು ಆಯಾ ಸ್ಥಾನಗಳಿಗೆ ಪುನಃ ಸೇರಿಸಿ ನೋವನ್ನು ಪರಿಹರಿಸುವುದು, ತಣ್ಣನೆ ಗಾಳಿ ಬೀಸುವುದು, ಕಬ್ಬಿಣದ (ಯಂತ್ರ) ಕೆಲಸಗಳನೇಕ, ಮುಂಡನ ಇವೇ ಮೊದಲಾದ ಹೊಸಹೊಸ ಕಾರ್ಯಗಳು ವಿದ್ಯುದ್ಯಂತ್ರವಿಶೇಷಗಳಿಂದ ನಡೆಸಲ್ಪಡುತ್ತವೆ.

117 **भवुकं**—ಕ್ಷೇಮ—" **भावुकं भवुकं भव्यं कुशलं क्षेममस्त्रियाम्** "—ಪ್ರಜಾಕ್ಷೇಮದಲ್ಲಿ ನಿರತನಾದ ಕೃಷ್ಣಪ್ರಭುವು. **कोशादिम** . . . ರಾಜ್ಯದ ಬೊಕ್ಕಸ ಅಂದರೆ ಆಯುವ್ಯಯವಿಚಾರವಾದ ವಿಮರ್ಶೆಗಳಲ್ಲಿಯೂ ಕೂಡ. **अधिकृतीर्वितीर्य**—ಅಧಿಕಾರಗಳನ್ನು ಕೊಟ್ಟು.

118 **तात्त्विकसभा-लोकानां**—ಆ ಸಭೆಯ ಜನರಿಗೆ. **राजकीय** . . ರಾಜ್ಯಭಾರದ ಚರ್ಚೆಯ ಅಧಿಕಾರಗಳನ್ನು.

119 **अध्वसन्दृश्यसूचीं**–ಬೀದಿಯಲ್ಲಿ ಸೂಜಿಬಿದ್ದಿದ್ದರೂ ಕಾಣುವಷ್ಟು ಬೆಳಕುಳ್ಳ. **तमीति प्रथितं नाम मृषा (इति) के न ब्रूयुः** ಎಂದು ಅನ್ವಯ. **अनोयान**—ಉಸಿರು ಅಥವಾ ಗಾಳಿಯಿಂದ ಚಲಿಸುವ ವಾಹನಗಳು ; ಬೈಸಿಕಲ್, ಮೋಟಾರ್ ಕಾರ್ ಇತ್ಯಾದಿಗಳು.

120 ಮೈಸೂರು ನಗರದಲ್ಲಿ ಸಂಗೀತವಿದ್ಯೆಯು ನಾನಾವಿಧವಾಗಿ ವಿಲಾಸಪಡುತ್ತಿದೆಯೆಂಬುದರ ವರ್ಣನೆ.

121 ಕುಷ್ಠರೋಗದ ಆಸ್ಪತ್ರೆ. **सङ्क्रमोत्थः**—ಸಂಪರ್ಕದಿಂದುಂಟಾದ (ಅಂಟುಜಾಡ್ಯ).

122 ವಿಕ್ಟೋರಿಯಾ ಆಸ್ಪತ್ರೆಯನ್ನು ಸ್ಥಾಪಿಸಿದುದು—ವಿಕ್ಟೋರಿಯಾ ಚಕ್ರವರ್ತಿನಿಯು ತನ್ನಲ್ಲಿಟ್ಟಿದ್ದ ಆದರಾತಿಶಯವನ್ನು ತೋರ್ಪಡಿಸುವುದಕ್ಕೆ ಅಥವಾ ಜ್ಞಾಪಿಸುವುದಕ್ಕೆ

123 **श्लथं**—ಸಡಿಲವಾದ, ಮಂದವಾದ, ಶಿಥಿಲವಾದ, ಖಿಲವಾದ. **आयुषो निगम** . . . ಆಯುರ್ವೇದದ ವೈದ್ಯಶಾಲೆಯನ್ನು. **अवितुं** ರಕ್ಷಿಸುವುದಕ್ಕೆ. **मितधनप्रसाध्यं**—ಕಮ್ಮಿಹಣದಿಂದ ನಡೆಸಲು ಸಾಧ್ಯವಾದ

124 **शैलेष्वष्टेन्दुसङ्ख्ये**—1857. **इषमासे**=ಆಶ್ವಯುಜಮಾಸದಲ್ಲಿ. **उदितायाः**—ಉತ್ಪನ್ನವಾದ, ಸಮ್ಮಿಳಿತವಾದ. **गणकपरिषदः**—ಜ್ಯೋತಿಷ್ಕರಸಭೆಯ. **प्रार्थनां स्वान्ते कृत्वा**—ಪ್ರಾರ್ಥನೆಯನ್ನು ಚಿತ್ತಕ್ಕೆ ತೆಗೆದುಕೊಂಡು. **गिरिशिरसि**–ಚಾಮುಂಡೀಬೆಟ್ಟದಮೇಲೆ. **खगानां** ಆಕಾಶದಲ್ಲಿ ಸಂಚರಿಸುವ ಗ್ರಹಗಳ, **ग्रहगणित**—ಗ್ರಹಗಳ ಸಂಬಂಧವಾದ ಗಣಿತಶಾಸ್ತ್ರ; 'ಅಸ್ಥಾನಮಿ'

125 **उपकार्यां**—ಅರಮನೆಯನ್ನು. **तां देवीं**—ಚಾಮುಂಡಾಂಬೆಯನ್ನು. **एकतानः**—ಒಂದೇಮನಸ್ಸಿನಿಂದ (ತದೇಕಚಿತ್ತನಾಗಿ)

126 ಶ್ರೀಗೋಪಾಲಕೃಷ್ಣಸ್ವಾಮಿ ದೇವಸ್ಥಾನದಿಂದ ಪ್ರತಿವರ್ಷವೂ ಹೊರಡುವ ಗೋವಿನುತ್ಸವವು ಕೃಷ್ಣಜನ್ಮಾಷ್ಟಮಿಯ ಮಾರನೆಯ ದಿನದಿಂದ 8 ದಿವಸಗಳು ದಿವ್ಯವಾಗಿ ನಡೆಯುತ್ತದೆ. **मनोज्ञ**–ಮನೋಹರವಾದ. **तज्जनेः परात् दिनात्**–ಕೃಷ್ಣಜನನದ ಮಾರನೇದಿನದಿಂದ. **महः**–ಉತ್ಸವವು.

127 ಈಚೆಗೆ ನಡೆದ ಬೇಲೂರು ಶ್ರೀ ಚನ್ನಕೇಶವಸ್ವಾಮಿದೇವಾಲಯದ ಜೀರ್ಣೋದ್ಧಾರವರ್ಣನೆ. **पुत्रिकौघं**—ಗೊಂಬೆ, ಪ್ರತಿಮೆ ಇವುಗಳ ಸಮೂಹವುಳ್ಳ.

128 ಸಜ್ಜನರು ಎಲ್ಲರಲ್ಲಿಯೂ ಸಮಾನದೃಷ್ಟಿಯುಳ್ಳವರೆಂದು ಲೋಕೋಕ್ತಿ.

129 **कृतज्ञस्य भावः—कार्तज्ञम्.** ಶ್ರೀಚಾಮರಾಜೇಂದ್ರ ಒಡೆಯರವರ ಪ್ರತಿಮೆಯ ಸ್ಥಾಪನೆ.

130 ಶ್ರೀಚಾಮರಾಜೇಂದ್ರ ಮೃಗಾಲಯದ ವರ್ಣನೆ. **भल्लूकः**—ಕರಡಿ; **शिखिन्**—(ಪು) ನವಿಲು; **वनमृगः**—ಕಪಿ; **कोलः**—ಹಂದಿ; **लुलायः**–(ಕಾಡು) ಕೋಣ; **शार्दूल**—ಹುಲಿ; **शुनकः**—ನಾಯಿ; **वृषः**—ಗೂಳಿ, ಎತ್ತು; **सरटः**—ಹಲ್ಲಿ, ಹೆಂಟೆಗೊದ್ದ; **वृकः**—ತೋಳ; **जलदन्तिन्**—ನೀರಾನೆ; **जलनरः**—ನೀರುಮನುಷ್ಯ; **ग्राहः**—ಮೊಸಳೆ; **झषः**—ಮೀನು.

131 **महाजनि दिनोत्सवे**—ವರ್ಧಂತಿ ಮಹೋತ್ಸವದಲ್ಲಿ. **सोष्णीषकाः**—ಶಿರೋಭೂಷಣ (ಶಾಲು ರುಮಾಲು) ಗಳುಳ್ಳವರಾಗಿ. ವಿದ್ವದ್ವರ್ಗವು ಮಹಾರಾಜರಿಗೆ ಫಲಮಂತ್ರಾಕ್ಷತೆಗಳನ್ನೊಪ್ಪಿಸುವುದರ ವರ್ಣನೆ.

132 ವರ್ಧಂತಿ ಮೆರವಣಿಗೆಯಾಗುವಾಗ ಶ್ರೀಮನ್ಮಹಾರಾಜರು ಆಕಾಶದಲ್ಲಿ ದೇದೀಪ್ಯಮಾನವಾಗಿ ಸಂಚರಿಸುವ ಸುರಾಗ್ರಣಿಯೆಂದು ನಾವು ತಿಳಿಯುತ್ತೇವೆ—ಉತ್ಪ್ರೇಕ್ಷೆ.

**134** ವಿಶ್ವವಿದ್ಯಾಲಯಸ್ಥಾಪನೆ. **प्रतिसमं**—ಪ್ರತಿವರ್ಷವೂ (ಅವ್ಯಯ)

**135-136** ವಿಶ್ವವಿದ್ಯಾನಿಲಯದಲ್ಲಿ ಪರೀಕ್ಷಾಫಲಿತಾಂಶಗಳನ್ನು ಪ್ರಕಟಿಸುವಾಗ ನೋಡಬಹುದಾದ ದೃಶ್ಯ. **भव्याभव्यावबोध**—ಶುಭಾಶುಭದ ತಿಳುವಳಿಕೆ ಅಂದರೆ ಉತ್ತೀರ್ಣ, ಅನುತ್ತೀರ್ಣ ಎಂಬ ಸಮಾಚಾರವನ್ನು ತಿಳಿಯುವುದು. **अनागस्कृतं**—ತಪ್ಪಿಲ್ಲದಿದ್ದರೂ ಸಂಭವಿಸಿದ. **विधिहतकविधि**—ನೀಚವಿಧಿಯ ಮಾರ್ಗವನ್ನು

**स्वं शपन्ति**—ತಮ್ಮನ್ನು ನಿಂದಿಸಿಕೊಳ್ಳುತ್ತಾರೆ.

**विपुलस्वव्ययात्**—ಅಪಾರವಾದ ಹಣದ ವ್ಯಯದಿಂದ **सुरगुरुसदृशं...** ಬೃಹಸ್ಪತಿಗೆ ಸಮಾನರೆಂದು ತಿಳಿಯುತ್ತಾರೆ. **लघुतरमृदुलश्मश्रु हस्तैः स्पृशन्तः**—ಚಿಗುರುತ್ತಿರುವ ನಯವಾದ ಮೀಸೆಯ ಮೇಲೆ ಕೈ ಹಾಕುವವರಾಗಿ

**137** ಪಂಡಿತರಿಗೆ ಏರ್ಪಡಿಸಿರುವ ಮಾಸಾಶನರೂಪವಾದ ಮರ್ಯಾದೆಯು ಇಲ್ಲಿ ಸ್ತುತವಾಗಿದೆ. **निरुपहति**—ವಿಚ್ಛೇದವಿಲ್ಲದೆ

**138** ಶ್ರೀಭಾಸ್ಕರಾಚಾರ್ಯೋಪದಿಷ್ಟವಾದ ಗೋಳಯಂತ್ರ, ಪ್ರಾಚೀನಗ್ರಂಥ ಭಾಂಡಾಗಾರ, ಶ್ರೀವಿದ್ಯಾಗಣಪತಿ, ಪುಷ್ಪಲತೆಗಳು, ಸಂಪಿಗೆಗಿಡಗಳು, ವಿದ್ಯಾರ್ಥಿನಿಲಯ, ಹುಲ್ಲುಮೈದಾನ, ಜಗಲಿಗಳು ಮುಂತಾದುವುಗಳಿಂದ ಶ್ರೀಮನ್ಮಹಾರಾಜ ಸಂಸ್ಕೃತಮಹಾಪಾಠಶಾಲೆಯು ವಿರಾಜಿಸುತ್ತಿದೆ.

**139** ಶ್ರೀಮನ್ಮಹಾರಾಣಿಯವರ ಕಾಲೇಜು ಸ್ಥಾಪಿತವಾದುದು. **सुदतयः**—ಸ್ತ್ರೀಯರು.

**140** ಸ್ತ್ರೀಯರ ಪ್ರೌಢಿಮೆಯನ್ನು ವಿವರಿಸಿದೆ. ವ್ಯಾಕರಣಪ್ರಣೇತನಾದ ಪಾಣಿನಿಯು ಕೆಲವು ಸಂದರ್ಭದಲ್ಲಿ ಸ್ತ್ರೀಲಿಂಗವಾಚಿಯಾದ ಶಬ್ದಗಳು ಪುಲ್ಲಿಂಗವಾಗುತ್ತವೆಂಬ ಭಾಷಾಗುಣವನ್ನು **स्त्रियाः पुंवत्** ಇತ್ಯಾದಿ ಸೂತ್ರದಲ್ಲಿ ಹೇಳಿದ್ದಾನೆ. ಈಗ ಪರೀಕ್ಷೆಗಳನ್ನು ಕೊಡುವುದು, ಗ್ರಂಥಗಳನ್ನು ಬರೆಯುವುದು, ಸೀಮೆಗೆ ಹೋಗಿ ವಿದ್ಯಾಭ್ಯಾಸಮಾಡುವುದು, ವೈದ್ಯ ಚಿಕಿತ್ಸೆ ಮುಂತಾದ ಕಲೆಗಳಲ್ಲಿ ಪುರುಷರಂತೆ (**पुंवत्**) ಯೇ ಸ್ತ್ರೀಯರೂ ಶ್ಲಾಘ್ಯರಾಗುತ್ತಿರುವುದರಿಂದ ಕವಿಯು ಹೀಗೆ ಉತ್ಪ್ರೇಕ್ಷಿಸಿದ್ದಾನೆ.

**141** ಅಖಂಡಕರುಣಾಸಮುದ್ರನಾದ ಶ್ರೀಕೃಷ್ಣನ ಕಟಾಕ್ಷದಿಂದ ನಮ್ಮ ಶ್ರೀಕೃಷ್ಣರಾಜಮಹಾರಾಜನು ನೂರುಕಾಲ ರಾಜ್ಯವನ್ನಾಳುತ್ತಾ ಸರ್ವೋತ್ತಮನಾಗಿರಲೆಂದು ಆಶೀರ್ವಾದ.

---

# दूतवाक्यम्

142 8ನೇ ಟಿಪ್ಪಣಿಯನ್ನು ನೋಡಿ

143 **सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव ॥**

ಬಾಣಭಟ್ಟನ ಹರ್ಷಚರಿತ್ರೆಯ ಪೀಠಿಕಾಶ್ಲೋಕಗಳಲ್ಲೊಂದು.

144 **भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम् ।**
**स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥**—ರಾಜಶೇಖರಕವಿ

145 ವಾಕ್ಪತಿರಾಜನು ತನ್ನ ಗೌಡವಹೋ ಎಂಬ ಪ್ರಾಕೃತಗ್ರಂಥದಲ್ಲಿ ಭಾಸನನ್ನು **ज्वलनमित्र** ನೆಂದು ಕರೆದಿದ್ದಾನೆ.

146 **यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**
**भासो हासः कविकुलगुरुः कालिदासो विलासः ।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः**
**केषां नैषा कथय कविताकामिनी कौतुकाय ॥**

ಜಯದೇವಕವಿ—ತನ್ನ ಪ್ರಸನ್ನರಾಘವನಾಟಕದಲ್ಲಿ.

147 ವ್ಯಾಯೋಗವೆಂಬ ದೃಶ್ಯಕಾವ್ಯವು ದಶರೂಪಕಗಳಲ್ಲೊಂದು. ಪ್ರಖ್ಯಾತವಾದ ಕಥೆ, ಪ್ರಖ್ಯಾತನಾಯಕ, ಯುದ್ಧಪ್ರಸಂಗಗಳು, ರೌದ್ರ, ವೀರ, ಶೃಂಗಾರರಸಗಳ ಪ್ರಾಧಾನ್ಯ, ಒಂದೇ ಅಂಕ—ಈ ಪರಿಯಾದುವು ವ್ಯಾಯೋಗಲಕ್ಷಣಗಳು.

148 ನಾಟಕಾರಂಭಕ್ಕೆ ಮುಂಚೆ ಮಾಡುವ ದೇವತಾಪೂಜೆ, ವಾದ್ಯಘೋಷ ಮುಂತಾದ ಕಾರ್ಯಕಲಾಪವು ನಾಂದಿಯೆನಿಸುವುದು. ನಾಟಕದ ಮಂಗಳಶ್ಲೋಕಕ್ಕೂ ನಾಂದಿ ಎಂದು ಹೆಸರು ಬಂದಿದೆ.

149 ಒಬ್ಬ ರಾಕ್ಷಸನ ಹೆಸರು

150 ಸಣ್ಣದಾದ ಮತ್ತು ಕೆಂಪಗಿರುವ ನಖಗಳುಳ್ಳ—**तनुताम्रनखेन येन पादेन . . . स पादः पायात्** ಎಂದನ್ವಯ.

151 ನಾಟಕದ ಹೆಸರು, ವಸ್ತು ಮತ್ತು ಕವಿ ಈ ವಿಷಯಗಳನ್ನೊಳಗೊಂಡ ಪೀಠಿಕಾಭಾಗಕ್ಕೆ ಪ್ರಸ್ತಾವನಾ ಅಥವಾ ಸ್ಥಾಪನಾ ಎಂದು ಸಂಜ್ಞೆ.

ಭಾಸನಾಟಕಗಳ ಪ್ರಸ್ತಾವನೆಗಳಾವುದರಲ್ಲಿಯೂ ಕಥಾವಸ್ತುವಿನಾ ಕವಿಯ ಹೆಸರಾಗಲೀ ನಾಟಕದ ಹೆಸರಾಗಲೀ ಉಕ್ತವಾಗಿಲ್ಲವೆಂಬುದು ವಿಶೇಷ.

152 ಪೂರ್ಣಿಮಾಚಂದ್ರ

153 **दन्ता मुसला इव दन्तमुसलाः; उत्कृत्ता दन्तमुसला येषां तानि ।** ಮುಸಲಾಯುಧ (club, mace) ದೋಪಾದಿಯಲ್ಲಿರುವ ಆನೆಗಳ ದಂತವನ್ನು ಮುರಿದು ಮುಖಭಂಗಮಾಡಬೇಕೆನ್ನಿಸುತ್ತದೆ. ದುರ್ಯೋಧನನ ಯುದ್ಧೋತ್ಸಾಹವು ವ್ಯಕ್ತವಾಗಿದೆ.

154 ಇವರಿಬ್ಬರು ದುರ್ಯೋಧನನ ಸಾಮಂತರು ಮತ್ತು ಆಪ್ತಮಂತ್ರಿಗಳು.

155 ವಿಷಯವು ಗಹನವಾದುದು, ಆಲೋಚಿಸಿ ಹೇಳಬೇಕೆನ್ನುವಿರೋ ?

156 ಅಯ್ಯೋ, ಸೇವಾಧರ್ಮವೇ ! ' ಅರ್ಥವಿಲ್ಲದ ' ಸಂಪ್ರದಾಯ ಎಂಬದಾಗಿ ಸೇವಾಧರ್ಮವನ್ನು ಅಲ್ಲಗಳೆಯುವ ಮಾತು. ಆದರೂ ಅದನ್ನು ಪಾಲಿಸ ಬೇಕಲ್ಲವೇ ?

157 ಶಕುನಿ—ದುರ್ಯೋಧನನ ಸೋದರಮಾವ

158 ಭೀಷ್ಮರಿಗೆ ಸೈನಾಪತ್ಯಾಭಿಷೇಕವಾಗುವುದರ ಜೊತೆಯಲ್ಲಿಯೇ ಶತ್ರುರಾಜರ ಹೃದಯವೂ ಬೀಳಲಿ. ಅಂದರೆ ಎದೆಗುಂದಲಿ ಎಂದರ್ಥ. ಯದ್ಯಪಿ ವೈಕರ್ಣವರ್ಷದೇವರು, ಶಕುನಿ ಇವರನ್ನು ಪ್ರಶ್ನೆಮಾಡಿದರೂ ಅವರ ನೈಜವಾದ ಉತ್ತರಗಳನ್ನು ನಿರೀಕ್ಷಿಸದೆ ಸ್ವಂತ ಊಹೆಯಿಂದಲೇ ಮಂತ್ರಾಲೋಚನೆ ನಡೆಸುತ್ತಿರುವ ಧೀರನನ್ನು ಗಮನಿಸಿ. ಭೀಷ್ಮದ್ರೋಣರಂಥ ತಿಮಿತಿಮಿಂಗಿಲಪ್ರಾಯರಾದ ಶೂರರು ಇವನ ಮುಂದೆ ಸೂತ್ರದ ಗೊಂಬೆಗಳು.

159 ಬೃಹದ್ರಥನ ಮಗನಾದ ಜರಾಸಂಧನಿಂದಪಹೃತವಾದ ರಾಜ್ಯ, ಭೋಗ, ಕೀರ್ತಿಗಳುಳ್ಳ. ಕೃಷ್ಣನು ಜರಾಸಂಧನಿಂದ ಅವಮಾನಿತನಾಗಿ ಅವನಿಗೆ ಹೆದರಿ ಓಡಿಹೋದನೆಂದು ಕಥೆ.

160 ಒಪ್ಪತಕ್ಕದ್ದಾಗಿದೆ. ವಿಶೇಷಣಗಳಾವುದೂ ಇಲ್ಲದೆ ಕೇವಲ ಕೇಶವನೆಂದು ನಾಮಮಾತ್ರ ನಿರ್ದೇಶವು ಸಮೀಚೀನವಾಗಿದೆಯೆಂದು ತಾತ್ಪರ್ಯ.

161 ವಾಸುದೇವನನ್ನು ಸೆರೆಹಿಡಿದರೆ ಪಾಂಡವರಿಗೆ ಕಣ್ಣುಕಿತ್ತಂತಾಗುವುದು. ಅವರು ಹೀಗೆ ಗತಿಹೀನರೂ, ಮತಿಹೀನರೂ ಆಗಲು ಈ ಸಮಸ್ತಭೂಮಂಡಲವೂ ನನಗೆ ಶತ್ರುರಹಿತವಾಗುವುದು.

162 ಸಭಾಸ್ತಂಭವನ್ನು ಕಣ್ಣಿನಿಂದ ತೂಗುತ್ತಿದ್ದಾನೆ. । ಅಂದರೆ, ದ್ರೌಪದಿಗೆ ಅಪಮಾನಮಾಡುತ್ತಿರುವ ಈ ನೀಚರನ್ನು ಈ ಸಭಾಸ್ತಂಭವನ್ನೇ ಕಿತ್ತು ಅದರಿಂದ ಹೊಡೆದು ಅಪ್ಪಳಿಸಲೇ ಎಂದಭಿಪ್ರಾಯವಿರುವಂತೆ ಭೀಮನು ರೋಷಾವೇಶವನ್ನು ತಾಳಿ ಸಭಾಸ್ತಂಭಗಳನ್ನು ನೋಡುತ್ತಿದ್ದಾನೆ.

163 ಎರಡು ಜಿಂಕೆಮರಿಗಳು ಮರಣಭಯವಿಲ್ಲದೆ ಸಿಂಹವನ್ನೆದುರಿಸಿದಂತೆ

164 **ಅಹಮೇವ ನೀಚಃ, ಅನ್ಯಥಾ ವಿಪರೀತಮತಿಃ ಕಥಂ ವಾ ಸ್ಯಾಂ : ಹೇ ನಯ ನಯಜ್ಞೌ ಅದ್ಯ ರೋಷಂ ಪರಿತ್ಯಜತಮ್** ಎಂದನ್ವಯ. ನಾನೇ ನೀಚನು, ಅಲ್ಲದಿದ್ದರೆ ದ್ಯೂತವಾಡಬೇಕೆಂಬ ವಿಪರೀತಬುದ್ಧಿಯು ಏಕೆ ಬರುತ್ತಿತ್ತು? ನೀವು ನೀತಿಯನ್ನು ಬಲ್ಲವರು ; ಕೋಪವನ್ನು ತ್ಯಜಿಸಿ ; ಹಾಗಿಲ್ಲದೆ ಪೌರುಷವನ್ನು ತೋರಿಸಲೆಣಿಸಿದರೆ ದೊಡ್ಡವರ ಹಾಸ್ಯಕ್ಕೊಳಗಾಗುವೆವು. ಜೂಜಾಡುವುದು ಆಡಿಬಿಟ್ಟು ಅದರ ಜಯಾಪಜಯಗಳನ್ನು ನ್ಯಾಯರೀತಿಯಲ್ಲಿ ಸಹಿಸಲಾರದ ಹೇಡಿಗಳೆಂದು ಜನರು ನಮ್ಮನ್ನು ಅವಹೇಳನ ಮಾಡುವರೆಂದು ಭಾವ.

165 ಇದು ಶಕುನಿಯ ವರ್ಣನೆ.

166 ಬಟ್ಟೆಯ ತುದಿಯಿಂದ ಮುಖವನ್ನು ಮುಚ್ಚಿಕೊಂಡಿದ್ದಾರೆ.

167 ಚಿತ್ರದಲ್ಲಿ ಪ್ರತಿಯೊಂದು ಪಾತ್ರವೂ ಸಂಧರ್ಭಕ್ಕನುಸಾರವಾಗಿ ಮತ್ತು ಸಹಜವಾದ ಮುಖಭಾವವುಳ್ಳದ್ದಾಗಿದೆ ಎಂದಭಿಪ್ರಾಯ.

168 ಪಕ್ಷಿಯ ಮೇಲೇರಿ ಹಾರುವುದರಿಂದ ಮಾತ್ರ ಗರ್ವಿತನಾದ

169 **ಕೃಷ್ಣಮತಿಃ**—(ಕಪ್ಪಾದ) ಕುಟಿಲವಾದ ಬುದ್ಧಿಯುಳ್ಳವನು, ಯಾವಾಗಲೂ ಧರ್ಮಮಾರ್ಗವನ್ನು ತ್ಯಜಿಸದ ಧರ್ಮರಾಜನ ಮೃದುಮಾತುಗಳು ದುರ್ಯೋಧನನ ಅಭಿಪ್ರಾಯದಲ್ಲಿ ಹೆಂಗಸಿನ ಮಾತುಗಳಂತೆ !

170 ತನ್ನ ದೌತ್ಯವು ನಿಷ್ಫಲವೂ ಅವಮಾನಕರವೂ ಎಂದು ಶ್ರೀಕೃಷ್ಣನು ಚನ್ನಾಗಿ ತಿಳಿದಿದ್ದನು.

171 ನಾನಾವಿಧವಾದ ಉಪಯೋಗವುಳ್ಳ

172 ಕುಶಲಪ್ರಶ್ನೆ. ಹೇಗಿದ್ದೀ ? ಇಂಗ್ಲಿಷಿನಲ್ಲಿ How do you do? ಎನ್ನುವಂತೆ.

173 ಯಮಧರ್ಮರಾಯನ ಮಗನು, ವಾಯುದೇವರ ಮಗನು, ಇಂದ್ರಪುತ್ರ ಮತ್ತು ಅಶ್ವಿನೀದೇವತೆಗಳ ಪುತ್ರರು ಎಂದು ಸಾಭಿಪ್ರಾಯವಾಗಿ ಪಾಂಡವರನ್ನು ನಿರ್ದೇಶಮಾಡುತ್ತಾನೆ. ಅಂದರೆ ಪಾಂಡವರು ಪಾಂಡುರಾಜನ ಮಕ್ಕಳಲ್ಲ; ದೇವತೆಗಳ ಮಕ್ಕಳು ಎಂದು ಧ್ವನಿ. 183ನೇ ಟಿಪ್ಪಣಿಯನ್ನು ನೋಡಿ.

174 ಇದು **ಶರೀರ** ಎಂಬುದರ ವಿಶೇಷಣ. ದೇಹದಲ್ಲಿಯೂ ಮನಸ್ಸಿನಲ್ಲಿಯೂ ಆರೋಗ್ಯವೇ ಎಂದರ್ಥ.

175 **ಸಮಯ**:—ಕರಾರು; ಹನ್ನೆರಡುವರ್ಷ ವನವಾಸ, ಒಂದು ವರ್ಷ ಅಜ್ಞಾತ ವಾಸವೆಂಬ ಕಟ್ಟಲೆ.

176 ಒಂದು ದಿನ ಬೇಟೆಯಾಡುತ್ತಿದ್ದಾಗ ಪಾಂಡುರಾಜನು ಕಾಣದೆ, ಜಿಂಕೆವೇಷ ವನ್ನು ತಾಳಿ ಹೆಣ್ಣುಜಿಂಕೆಯ ಜೊತೆಯಲ್ಲಿ ವಿಹಾರ ಮಾಡುತ್ತಿದ್ದ ಕಿಂದ ಮನೆಂಬ ಋಷಿಯನ್ನು ಕೊಂದು ಅವನಿಂದ ಶಾಪಗ್ರಸ್ತನಾದನು.

177 ಇದೂ ಒಂದು ಪೂರ್ವಕಥೆ. ಪಾಂಡವರ ಜನ್ಮವು ಅಕ್ರಮವಾದರೆ ಕೌರವರ ದ್ದೇನೂ ಶ್ಲಾಘ್ಯವಲ್ಲವೆಂಬುದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಹೊರಗೆಡಹುತ್ತಾನೆ. ವಿಚಿತ್ರವೀರ್ಯರಾಜನು ವಿಷಯಲಂಪಟನಾಗಿ ಕೊನೆಗೆ ಕ್ಷಯದಿಂದ ಪ್ರಾಣಬಿಟ್ಟನು. ಅನಂತರ ಅವನ ರಾಣಿಯಾದ ಅಂಬಿಕೆಯು ವ್ಯಾಸರ ಅನುಗ್ರಹದಿಂದ ಧೃತರಾಷ್ಟ್ರನನ್ನು ಪಡೆದಳು.

178 ಶಾಂತಮತಿಗಳಾದ ಮುನಿಗಳಿಂದ ಸೇವಿಸಲ್ಪಟ್ಟ

179 ಅದು ನನ್ನ ತಪ್ಪಿನಿಂದಾಯಿತೆಂದು ತಿಳಿಯಬೇಡ.

180 159ನೇ ಟಿಪ್ಪಣಿಯನ್ನು ನೋಡಿ.

181 ದೇಶಕಾಲಾನುಸಾರವಾಗಿ ಶೌರ್ಯವನ್ನು ತೋರಿಸಬೇಕು. ಪ್ರಾಜ್ಞನು ಕೆಲಸಮಯದಲ್ಲಿ ಯುದ್ಧಮಾಡುವನು, ಕೆಲಸಮಯದಲ್ಲಿ ಸಂಧಾನದಿಂದ ಜಯಶಾಲಿಯಾಗುವನು.

182 ಗುಣವಲ್ಲದವುಗಳು, ದೋಷಗಳು

183 **ಪಿಷ್ಟಪೇಷಣ**—ಚರ್ವಿತಚರ್ವಣ. ಬೀಸಿದ್ದೇ ಬೀಸುವುದು. ಪುನರುಕ್ತಿ; ಅನವಶ್ಯಕವಾದ ವ್ಯರ್ಥವಾದ ಮಾತು ಎಂದು ಭಾವ. 'ಸಾಕು, ಪ್ರಸಂಗವನ್ನು ನಿಲ್ಲಿಸು!' ಏನು ಗರ್ಜನೆ!

184 ಅರ್ಜುನನ ಸಾಹಸಗಳನ್ನು ವರ್ಣಿಸುವ ನಾಲ್ಕು ಪೂರ್ವವೃತ್ತಾಂತಗಳನ್ನು ಇಲ್ಲಿ ಹೇಳಿದೆ.

185 ಗಂಧರ್ವರಾಜನಾದ ಚಿತ್ರಸೇನನಿಂದ ಸೆರೆಹಿಡಿದು ಒಯ್ಯಲ್ಪಡುತ್ತಿದ್ದಾಗ ಅರ್ಜುನನೇ ಅವನನ್ನು ಬಿಡಿಸಿದನೆಂದು ಮತ್ತೊಂದು ಹಿಂದಿನ ಸನ್ನಿವೇಶ.

186 ನೀನು ಸಾಕ್ಷಾತ್ಸಲ್ಲಾಪಕ್ಕೆ ಅನರ್ಹನು. ಆದುದರಿಂದ ಹುಲ್ಲುಕಡ್ಡಿಯನ್ನು ಅಡ್ಡವಾಗಿಟ್ಟುಕೊಂಡು ತನ್ಮೂಲಕ ನಿನ್ನ ಕೈಲ ಮಾತನಾಡುತ್ತೇನೆ. ಅಂದರೆ ದುರ್ಯೋಧನನು ಅತಿತುಚ್ಛನು ಎಂದು ದೂಷಣೆ. ರಾಮಾಯಣ

ದಲ್ಲಿ ಸೀತೆಯು ರಾವಣನ ಕೈಲಿ ಮಾತನಾಡಬೇಕಾದಾಗ ಹುಲ್ಲುಕಡ್ಡಿಯನ್ನು ಮಧ್ಯದಲ್ಲಿಟ್ಟು ಮಾತನಾಡುತ್ತಾಳೆ.

187 ತಲೆಯೆತ್ತದಂತಹ ನೀಚಕೃತ್ಯಗಳನ್ನು ಮಾಡಿ ನಾಚಿಕೆಯಿಲ್ಲದೆ ಸಜ್ಜನರಾದ ನಮ್ಮೊಂದಿಗೆ ಮಾತನಾಡಲು ಬಯಸುವೆಯಾ ?

188 ದನದ ದೊಡ್ಡಿಗೆ ಹೋಗು. ಇವೆಲ್ಲಾ ಪರಸ್ಪರ ಬೈಗುಳದ ಮಾತುಗಳು.

189 ಯಾರ ಮೇಲೆ ನಾನೀಗ ಕೈಮಾಡಬೇಕಾಗಿದೆ ?

190 ಭೂಭಾರವನ್ನು ಪರಿಹಾರಮಾಡುವುದಕ್ಕೆ ಅವತರಿಸಿದ ವಾಸುದೇವನು ದುರ್ಯೋಧನನೊಬ್ಬನನ್ನು ಈ ರೀತಿ ನಿಮಿಷಮಾತ್ರದಲ್ಲಿ ಧ್ವಂಸಮಾಡಿದರೆ, ಶ್ರಮವು ವಿಫಲವಾಗುವುದು. ಅವನ ಜೊತೆಯಲ್ಲಿ ನಾಶಹೊಂದಬೇಕಾದವರು ಇನ್ನೂ ಅನೇಕರಿರುವರು. ಅಂತು ಅವನನ್ನು ಸಂಹರಿಸುವುದಕ್ಕೆ ಸಮಯವಲ್ಲವೆಂದು ಸುದರ್ಶನನ ಸೂಚನೆ.

191 ಮೂರುಲೋಕಗಳನ್ನೂ ಮೂರುಹೆಜ್ಜೆಗಳಿಂದ ಅಳೆದ ಮಹಾಮಹಿಮನಾದ ಸಾಕ್ಷಾತ್ ನಾರಾಯಣನಿವನು—ವಾಮನಾವತಾರದ ವಿಲಾಸ.

192 ನಾಟಕದ ಕೊನೆಯಲ್ಲಿ ನಟರು ಮಾಡುವ ಮಂಗಳಾಶಾಸನ.